सद्योजातायनमः इतिमंत्रेणहृल्लीयात्
ॐहंईशानवक्त्रायनमः मृदंस्थापयेत् ॐ
वंवामदेवायनमः इतिशर्वोक्तनीत्याकुंडंप्र
कल्पयेत् ॐरंअघोररूद्रायनमः इतिगो
मयेनलेपयेत् एवंकुंडंकृत्वा ॐआत्मास
नायनमः इत्यासनेपुष्पंदत्वोपविश्यकल
शहस्ताद्यादिपरहेकुंडंकृतः नदाद्वार
रक्षांकुर्यात् यदुक्तम् तथाचालयतोन्यत्र
वाक्रियामयदानदा द्वारपालार्चनंकुर्याद्दि

गन्धावगुण्ठनम् यदा न चालयेद् होमः त
दैतन्नोपयुज्यते इति स्वदत्तेनार्घपात्रं कुर्या
न्नेत्रं तत्कोणे प्राणायामः स्वात्मरक्षा स्वा
यो मूलेन साङ्गेनात्मविद्याशिवप्रकृतिपुरुष
तत्त्वपञ्चकेन विघ्नार्कपात्रपूजनम् तन्निक
टे केवलेन मूलेन साङ्गेन निरोधार्घम् अस्य
निष्ठुरमुद्राप्रदर्शयेत् मुष्टीबद्धाततः कृत्वा
ऽङ्गुष्ठेन तलमध्यगौ निष्ठुरेति समाख्याता
मुद्रेयं रोधिनी विभोः स्वदत्तेनाभिसमीपे स्व
लेन साङ्गेन पाशुपतास्त्रेणाचाशिष्यप्रोक्षण
पात्रं कुर्यात् तन्निकटे ओं हूं शिवाय नमः
इति शिवमन्त्रजपं शिवाम्बुचकार्यम् ओं हूं फ
ट् षड्विंशतत्त्वरूपाय ज्ञानखड्गरूपिणेऽस्त्रा
माय नमः अस्त्रार्घपात्रान्तं कुण्डसंस्कारान्कुर्या
त् यथा ओं हूं फट् एवं मन्त्रोद्धारं परहस्तव
लोकनेन प्रोक्षणम् खरणम् समीकरणम्
सेचनम् कुट्टनम् मार्जनम् अवलेपनम्
पुनः पञ्चगव्येन प्रोक्षणम् शोषणं चेति कुं
डसंस्कारं स्यु ओं क्रियाशक्त्यात्मने कुण्डाय न
मः इति रक्षा ओं हूं फट् इत्यभिमन्त्रणम् ओं

कला॰
टी॰
३२
32

हूं॰फट् इत्यभिमंत्रणम् ॐ हूं॰फट् वश्रीकर
णं करोमि फट् वश्रीकरणं यथा निन्नः सर्व
मुखो रेखोः स्पष्टाकायाः तमध्यमा यामुसोमय
मुखीयैकावच्छ्रमेतत्मकल्पयेत् वहिरंतेस्व
दर्भाग्रैच्छादनं गृहह्रेतवे इतिसर्वाग्रान्दर्भै
राच्छादनम् संस्काराः ३ एवं १९ कुंडदले
शुष्कगोमयदर्भाविष्टरोपरिब्रह्मणोवासनम्
ॐब्रह्मासनायनमः ॐब्रह्मन्नागच्छागच्छे
त्यावाह्यसन्निधेहि २ सन्निधत्स्व २ ॐस्ववर्गद
यामिनमः इत्यवगुंठ्य ध्यानमाह ॐब्रह्मा
चतुर्मुखोरक्तमालवीडविभूषितः कृष्णा
जिनोत्तरीयश्चराजीवासनसंस्थितः कमं
डलधरोदेविदंडहस्तस्तथैवच अक्षमाला
धरोदेवः पद्मह्रस्तःसुलोचनः ध्यात्वापत्रे
भूतन्यसेत्सर्वकिल्बिषनाशनम् ॐक्रांच
तुर्वेदस्वरायगायत्रीसहितायब्रह्मणेनमः
इतिपाद्यादिनाश्रजयेत् तदग्रदर्भद्वयेनम
ध्येचतन्मध्येकाल्पितेविष्टरोपरि ॐवागीशा
यनमः इत्यासनश्जा ॐह्रांभगवतिवागी
श्वर्यागच्छेत्यावाहनादि ध्यानम् नीलोत्प

लदलश्यामामृतमञ्चारुलोचनाम् सर्वल
क्षणसंपूर्णांसर्वावयवभूषिताम् ध्यात्वाचै
वंविधांदेवींस्थापयेत्कुंडमध्यतः रक्तकाल
श्वोनानाशिरसेशानसंस्थिताम् पूजयेत्कुं
पत्रभ्याये भर्गमेत्रमन्त्रस्मरन् ह्रांभगवतिवा
गीश्वरीश्वरि पाद्यादिदत्वा ह्रुंवागीश्वर्यैनमः
इतिसंपूज्य पेशाशिरस्काणुन्नानामृतमतीं
भावयित्वासन्निधानायपयोनिमुद्रांप्रदर्शये
त् मध्यमेकुटजेकृत्वातर्जन्युपरिसंस्थिते
अनामिकामध्यगतेनथैवकनिष्ठके स
र्वाएकत्रसंयोज्याथोंगुष्ठपरिपीडिता पथा
नप्रवरामुद्रायोनिमुद्रेतियास्मृता वागीश्वयाः
ततःपात्रस्थमरणिदवभूर्यकांताथाद्विजगृ
होपनीतमग्निमानीय ओंहूंःफट् क्रव्यादं
निष्कर्षयामिफट् इतिदर्भकांडेप्रज्वाल्यने
र्ऋतेलिपेत ओंभैरवाग्नेःक्रव्यादरक्तस्वाहा
इत्याहुतिपंचकेनाक्तिनक्रव्यादशुद्धिः ओंहूंः
फट् प्रोक्षयामिनमः इतिप्रोक्ष्य ओंहेंअवगुं
ठयामिहुंमित्यवगुंठ्य २ ओंअग्नयेनमः
त्यभ्यर्चयेत् २ ध्यात्वंस्मृत्वा प्रकृवज्ञात्वेत्य

र्थः ४ पुनर्मूलमुच्चार्य वामनासापुटेन अग्निं
शुक्लरूपं द्वादशरकेन प्रविश्य स्वचैतन्यैकी
करणं कृत्वा दक्षिणनासापुटेन पावरेचयेत्
इति चैतन्यार्पणम् ओं क्लृं ज्ञानशक्त्यात्मने अग्न
ये नमः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इत्यंगानि सृजेनम्
ओं अमृतीकरोमि नमः इत्यमृतमुद्रयामृतीक
रणम् १ वामेवेटकेत्यादिध्यानेन स्वात्मानं
भैरवरूपं ध्यात्वा स्वयमहमेव भैरव इति दार्ढ्ये
न भैरवाभिमानं गृहीत्वा वह्निं शुक्लरूपं ध्यात्वा
वागीशीं मायारूपां ध्यात्वा ओं आमयामि नमः
इति कुण्डोपरि त्रिभ्राम्य तस्यां वागीश्वर्यां योनौ
ओं ह्रं योजयामि नमः इति कुण्डे वह्निं क्षिपेत् सं
स्काराः ९ चित्पिंगल हन २ दह २ पच २ स
र्वज्ञाज्ञापय स्वाहा इति मन्त्रेणाभ्युक्ष्य कृत्वात
मग्निं प्रज्वाल्योत्थाय कृतांजलिः ओं अग्निं प्रज्वा
लितं वंदे जातवेदं हुताशनम् सुवर्णवर्णम
मलं समिद्धं सर्वतोमुखम् इति ज्वलंतं वह्नि
मुपतिष्ठेत् वह्निमंत्रेण प्राणायामत्रयं कृ
त्वा भृगुऋषये नमः मूर्ध्नि गायत्रीछंदसे
नमः मुखे अग्निदेवतायै नमः हृदि इति वि

न्यस्यहोमार्थे विनियोगः इतिकृतांजलि
र्वदेत् सहस्रार्चिषेहृदयायनमः स्वस्तिपू
र्णायशिरसेस्वाहा उत्तिष्ठपुरुषायशिखा
यैवषट् धूमव्यापिनेकवचायहुं सप्तजि
ह्वायनेत्रत्रयायवौषट् धनुर्धरायअस्त्राय
फट् इतिकरन्यासंअंगन्यासंचकृत्वासप्त
जिह्वादिन्यासंकुर्यात् वैश्वानरजातवेदइहा
वहलोहिताक्षसर्वकर्माणिसाधयस्वाहाइत्य
ग्निमंत्रेणाभ्यर्चयेत् अथापरोग्निमंत्रः उत्ति
ष्ठहरिपिंगललोहिताक्षदेहिमेददापयस्वा
हा वर्णाः २४ इष्टंशक्तिंस्वस्तिकाभीतिमुच्चै
र्दीर्घैर्दोर्भिर्धारयंतंजपाभम् हेमाकल्पंपद्म
संस्थंत्रिनेत्रंध्यायेद्वह्निंबद्धमौलिंजटाभिः
इतिसंस्कारनवकंकृत्वा अग्रेणप्रोक्ष १
ॐवागीश्वर्यायोनिंप्रच्छादयामिनमः दर्भै
र्योनिप्रच्छादनम् २ ॐहुंःफट् अस्त्रवाटं
करोमिनमः इत्यष्टस्वादिक्ष्वर्धशूलैर्दर्भैरस्त्र
वाटः ३ ॐहुंःफट् इतिसमयावागीश्वर्याःकं
कणाबध्नामिनमः इतिजप्त्वाविष्टरंकृत्वा
कंकणारूपंदद्यात्तस्मेवागीश्वर्याश्चिन्तयेत्

कला॰ दी॰ ३५ 35

इति संस्कारचतुष्टयमन्यच्च कृत्वान्यान्संस्का
रांल्लिलाहुतिभिस्त्रिभिस्त्रिभिः कुर्यात् ॐ ह्रां
अग्नेर्गर्भाधानाय नमः इति संपूज्य ॐ लं अग्नेर्गर्भा
धानं करोमि स्वाहा आ ३ ॐ ह्रां अग्नेर्गर्भाधा
नं सम्पादयतां स्वाहा आ ३ संस्कार १ ॐ ह्रं अ
ग्नेपुमान्भव नमः कुशाग्रस्पर्शकरणात्संस्का
ॐ ह्रूं अग्नये पुंसे नमः इति सम्पूज्य ॐ रं अग्नेः
पुंसवनं करोमि स्वाहा आ ३ ॐ ह्रूं अग्नेः पुंस
वनं सम्पादयतां स्वाहा संस्कार २ ॐ ह्रैं अग्नेर्वि
भक्तावयवो नमः इति शर्णो ततः कुशाग्रे
णवाक्शिरीरं समभिर्मन्त्रैः कल्पयेत् तद्यथा
ॐ रं अग्नेः ग्रीवां कल्पयामि नमः एवं ॐ रं
अग्नेः अंसौ बाहू कटिम् जंघे इत्यंगानि कु
शाग्रेण कल्पयित्वा ॐ ह्रीं अग्नेः भागत्रयक
ल्पनां करोमि स्वाहा आ ३ ॐ ह्रीं अग्नेः भाग
त्रयकल्पनां करोमि स्वाहा आ ३ ॐ ह्रीं अग्नेः
मुखे शिवतत्त्वं कल्पयामि स्वाहा आ ३ ॐ
ह्रीं अग्नेः हृदि विद्यातत्त्वं कल्पयामि स्वाहा
आ ३ ॐ ह्रीं अग्नेः आत्मतत्त्वं कल्पयामि स्वा
हा आ ३ अथ यकवाटेष्टलकारेणैव प्रयो

गः वक्त्रेष्वेवं वक्त्रनिष्कृतिष्वेवं वक्त्रेनेत्रक
ल्पनाम् ऊर्ध्ववक्त्रवर्जं यकारेणैव प्रयोगः ॐ
लं अग्नेः ऊर्ध्वईशानकवाटं कल्पयामि स्वाहा
श्रा २ ॐ लं अग्नेर्दक्षिणे अघोरकवाटं कल्पया
मि स्वाहा श्रा २ ॐ लं अग्नेरुत्तरे वामदेवक
वाटं श्रा २ ॐ लं अग्नेः पश्चिमे सद्योजातकवा
टं कल्पयामि स्वाहा श्रा २ ॐ लं अग्नेः ऊर्ध्वई
शानवक्त्रं कल्पयामि स्वाहा श्रा २ एवं यं अ
ग्नेः पूर्वे तत्पुरुषवक्त्रं श्रा २ ॐ यं अग्नेः दक्षि
णे अघोरवक्त्रं श्रा २ ॐ यं अग्नेः वामदेवव
क्त्रं श्रा २ ॐ यं अग्नेः पश्चिमे सद्योजातवक्त्रं कल्प
यामि स्वाहा श्रा २ प्रत्येकं श्रा २ ॐ हं अग्ने
ऊर्ध्ववक्त्रनिष्कृतिं करोमि स्वाहा श्रा २ ॐ यं
अग्नेस्तत्पुरुषवक्त्रनिष्कृतिं करोमि स्वाहा
श्रा २ ॐ यं अग्नेः अघोरवक्त्रनिष्कृतिं करोमि
स्वाहा श्रा २ ॐ यं अग्नेः वामदेववक्त्रनिष्कृ
तिं करोमि स्वाहा श्रा २ ॐ यं अग्नेः सद्योजात
वक्त्रनिष्कृतिं करोमि स्वाहा श्रा २ प्रत्येकमा
हुतीः २ ॐ हं अग्नेः ऊर्ध्ववक्त्रे ॐ जं सः ज्योती
रूपनेत्रत्रयकल्पनां करोमि स्वाहा श्रा २

क॰ला
दी
३५
35

ॐ यं अग्नेः अघोरवक्त्रे एवं २ ज्योतीरूपनेत्र
त्रयकल्पनां करोमि स्वाहा श्रा २ ॐ यं अग्नेः
सद्योजातवक्त्रे २ ज्योतीरूपनेत्रत्रयकल्पनां
करोमि स्वाहा श्रा २ ॐ तं अग्नेः ऊर्ध्वकवाटे
स्तनार्धिनीं कलां कल्पयामि स्वाहा श्रा २ ॐ
अग्नेः पूर्वकवाटे नारायणीं कल्पयामि स्वाहा
श्रा २ ॐ तं अग्नेः दक्षकवाटे नारायणीं कल्पया
मि स्वाहा श्रा २ ॐ तं अग्नेः वामकवाटे स्तना
रीं कल्पयामि स्वाहा श्रा २ ॐ तं अग्नेः ऊर्ध्वव
क्त्रे शान्तातीतां कल्पयामि स्वाहा श्रा २ ॐ यं अ
ग्नेः पूर्वकवाटे शान्ताकलां कल्पयामि स्वाहा श्रा २
ॐ यं अग्नेः दक्षवक्त्रे विद्याकलां कल्पयामि स्वाहा
श्रा २ ॐ यं अग्नेः वामवक्त्रे प्रतिष्ठाकलां कल्प
यामि स्वाहा श्रा २ ॐ यं अग्नेः पश्चिमवक्त्रे निवृ
त्तिकलां कल्पयामि स्वाहा श्रा २ ॐ रं अग्नेः हृदि
उमाकलां कल्पयामि स्वाहा श्रा २ ॐ रं अग्नेः ग्री
वायां मोहाकलां कल्पयामि स्वाहा श्रा २ ॐ रं
अग्नेः दक्षांसे स्वधांकलां कल्पयामि स्वाहा श्रा
२ ॐ रं अग्नेः वामांसे निद्राकलां कल्पयामि स्वा
हा श्रा २ ॐ रं अग्नेः नाभौ मत्तकलां स्वाहा श्रा

र ॐ रं अग्नेर्जठरे भयाकलां र ॐ रं अग्नेरुर
सि जराकलां र प्रत्येकं आ र ॐ वं अग्नेः गु
ह्ये जराकलां र ॐ वं अग्नेः गुदे रक्तांकलां र
ॐ वं अग्नेर्दक्षोरौ रतिकलां र ॐ वं अग्नेः वामो
रौ पाल्यकलां र ॐ वं अग्नेर्दक्षजानुनि कामाख्या
कलां र ॐ वं अग्नेर्वामजानुनि तृष्णाकलां र
ॐ वं अग्नेर्दक्षजंघायाम् मतिकलां र ॐ वं अ
ग्नेर्वामजंघायां क्रियाकलां र ॐ वं अग्नेर्दक्ष
स्फिजि ऋद्धिकलांत् र ॐ वं अग्नेर्वामस्फिजि
रात्रिकलां र ॐ वं अग्नेः कट्यां भ्रामणीकलां
र ॐ वं अग्नेः दक्षपार्श्वे मोहनीकलां र ॐ वं अ
ग्नेः वामपार्श्वे मनोन्मनीकलां र प्रत्येकम् र
ॐ लं अग्नेर्दक्षपादे सिद्धिकलां कल्पयामि स्वा
हा र ॐ वं अग्नेर्वामपादे ऋद्धिकलां र ॐ लं
अग्नेर्दक्षहस्ते द्युतिकलां र ॐ लं अग्नेर्वामह
स्ते लक्ष्मीकलां र ॐ लं अग्नेः नासायां मेधाकलां
र ॐ लं अग्नेः शिरसि शान्तिकलां आ र ॐ लं अ
ग्नेर्दक्षभुजे स्वधाकलां आ र ॐ लं अग्नेर्वामभु
जे स्थितिकलां कल्पयामि स्वाहा आ र प्रत्येकं
आ र ॐ अग्नेः अघोरेभ्यः सर्वात्मने हृदयं कल्प

कला
टी
३८
38

यामिस्वाहा ३ ॐ अग्नेः अघोरेभ्यो घोरेभ्यो
ब्रह्मशिरः कल्पयामिस्वाहा श्रा ३ ॐ अग्नेः
घोरघोरतरेभ्यश्च ज्वालिनीं शिखां कल्पयामि
स्वाहा श्रा ३ ॐ अग्नेः सर्वतः सर्वसर्वेभ्यो पिंग
लं तुभ्यं घकवचं कल्पयामिस्वाहा श्रा ३ ॐ
नमस्तेरुद्ररूपेभ्यो तुभ्यं महापाशुपतास्त्रंक
ल्पयामिस्वाहा श्रा ३ नेत्रस्य श्वैकिवाट अग्नेयो
गः ॐ रं अग्नेः सीमन्तोनयनं भवतु स्वाहा श्रा
३ एवं संस्काराः ३ ॐ हूः अहः अग्निं जीवयामि
स्वाहा श्रा ३ ॐ हूं अग्नेः प्रसवामित्वो भवतु
मः इतिश्ज्ञावागीश्वर्याः अग्निः संजात इति वि
भाव्य ॐ यं अग्नेः जातकर्म करोमिस्वाहा श्रा
३ ॐ यमग्नेर्जातकर्म संपन्नमस्तु स्वाहा श्रा ३
संस्काराः ४ ॐ हूः फट् सूतकशुद्धिरस्तु स्वाहा
श्रा ३ ॐ इ पार्श्वोरण्यंमस्य ॐ लं अग्ने ऊर्ध्वव
क्त्रं वक्त्रोद्घाटनं करोमिस्वाहा ॐ यं अग्ने तत्पुरु
षवक्त्रं वक्त्रोद्घाटनं करोमिस्वाहा श्रा ३ ॐ रं अ
ग्ने अघोरवक्त्रं वक्त्रोद्घाटनं करोमिस्वाहा श्रा ३
ॐ अग्ने वामदेववक्त्रं वक्त्रोद्घाटनं करोमिस्वाहा
श्रा ३ ॐ अग्नेः सद्योजातवक्त्रं वक्त्रोद्घाटनं क

रोमि स्वाहा श्रा ३ ततः स्वस्वमंत्रपरामर्षेण
अस्त्रांते न वक्त्रशोधनं कुर्यात् तद्यथा ॐ ह्रं
अस्त्रे ईशानवक्त्रं शोधयामि हूः फट् स्वाहा श्रा
३ ॐ यं अस्त्रेः तत्पुरुषवक्त्रं शोधयामि हूः फट्
स्वाहा श्रा ३ ॐ रं अस्त्रेः अघोरवक्त्रं शोधयामि
हूः फट् स्वाहा श्रा ३ ॐ वं अस्त्रेः वामदेववक्त्रं शो
धयामि हूः फट् स्वाहा श्रा ३ ॐ लं अस्त्रेः सद्योजा
तवक्त्रं शोधयामि हूः फट् स्वाहा श्रा ३ ॐ हं अस्त्र
ेः ईशानवक्त्रे वक्त्राभिघारं करोमि हूः फट् स्वा
हा श्रा ३ ॐ यं अस्त्रेः तत्पुरुषवक्त्रे वक्त्राभिघा
रं करोमि स्वाहा ॐ रं अस्त्रेअघोरवक्त्रे वक्त्राभिघा
रं करोमि स्वाहा श्रा ३ ॐ वं अस्त्रेर्वामदेववक्त्रे व
क्त्राभिघारं करोमि स्वाहा श्रा ३ ॐ हूः फट् अग्निं
सम्मुखयामि हूः फट् स्वाहा इति शिवांभसा अंगुष्ठ
तर्जनीमध्येन तानवेद्धां तस्य श्राग्याम्यं प्रत्यगेव
त तेनैव च पर्येभ्यो रक्षार्थमदर्शयन् शिवां
भः पात्रेणाश्रोत्तणेकुर्यात् एवमेवाह्यार्चेपात्र
तः ॐ हूः फट् इशिवाग्निं परिसमूहामि फट् एवं
पर्युक्ष्यामि परिषिंचामि ततस्तान्न्यासोयथा
ॐ हूः फट् अग्निमास्तृणामि फट् इत्स्तरति

कला
दी
३७
37

णेतः उत्तरतः पश्चादिति आदौ त्रीणि ततः पं
च पंच पंच स्थलान्न्यसेदिति गुरवः स्थलन्यासः
ॐ ह्रः फट् सप्तभौम्यादितिथीनां स्थाणामि फट्
इति हस्तमात्रो दर्भपरिधी पूर्वे उत्तराग्रो दक्षि
णे पूर्वाग्रो उत्तरे पूर्वाग्रो पश्चिमे उत्तराग्रो न्यसे
त् ततो विष्टरन्यासः पूर्वे ब्रह्मणे नमः दक्षि
णे रुद्राय नमः उत्तरे सदाशिवाय नमः पश्चि
मे विष्णवे नमः इति विष्टरपूजा अथः कलशे
षु विष्टरेषु लोकपालान्सायुधान्पूजयेत् त
था तत्रादौ ज्वालालिंगोपरिस्थजलकलशे
(षु विष्टरेषु) सप्तदर्भपिंजरकृत विष्टरस्थिते
विघ्नं पूजयेत् तस्य ध्यानमाह देवं चतुर्भुजं ध्या
येच्छ्रीकंठं नीलकंठकम् चतुर्वक्त्रं त्रिशूलपाणि
मक्षसूत्रकरार्पितम् शूलमाकृष्टमत्युग्रं पृथ
कृशान्यासमान्वितम् तडित्संगेत हेमाभं साक्ष
मालाकमंडलम् ॐ ह्रूं ज्वालारूपाय ज्वालालिं
गस्थाय भैरवाय नमः इति शांतिकलशे अथ
लोकेशाः इंद्रं ध्यायेन्नृपं वज्रहस्तं त्रिणेत्रं बहुलोच
नम् ऐरावणसमारूढं भद्रं हस्तापरोहितम्
ॐ लं इंद्राय वज्रहस्ताय नमः वीरासनस्थं कृ

चोंकेसात्तसूत्रेसशक्तिकम् वह्निंध्यायेद
जारूढं पिंगलं पिंगलोचनम् ॐ रं अग्नयेश
क्तिहस्तायनमः यमंध्यायेत्सदंडं तु सकोप
महिषासनम् प्रेतनाथं पाशहस्तं होमेवि
घ्ननिवर्हणम् ॐ मं यमायदंडहस्तायनमः
तथैवनिर्ऋतिंध्यायेत्खड्गहस्तं वरासनम्
राक्षसाधिपतिंभीमंसर्वविघ्नप्रशान्तये ॐ लं
निर्ऋतयेखड्गहस्तायनमः वरुणंपाशहस्तं
तु श्वेतवर्णंफणासनम् अप्पतिंपाशिमेध्या
येडोमरत्नाकरंपरम् ॐ वं वरुणायपाशह
स्तायनमः ध्यायेत्पीताम्बरंवायुंधूम्रध्वजक
रंचलम् मृगासनंचरंकालंसर्वविघ्ननिवार
णम् ॐ धुं वायवेध्वजहस्तायनमः मेषारूढं
गदाहस्तंपीतंतंनरवाहनं यक्षाधिपंस्मरेद्रु
क्षाधर्मकामार्थसिद्धये ॐ कुं कुबेरायगदा
हस्तायनमः शूलहस्तोवृषारूढोजटामुकुट
मंडितः सितोगौरीयुतस्सोतोध्यायेत्त्रिपुरग
स्वरः ॐ हं ईशानायत्रिशूलहस्तायनमः ब्र
ह्मासौम्यश्चतुर्वक्त्रोहंसारूढोजटामंडलः लम्बकू
र्चोजिनीदंडकमंडलुकृशाङ्गधृत ध्येयोवि

ग्रहरः स्वशाक्तिविज्ञलज्जासनः ॐ क्रों ब्रह्म
णे पद्महस्ताय नमः पातालदिग्गतं ध्यायेत्
कूर्मारूढं हलायुधम् सितं सहस्रफणिनम
नंताख्यं फणीश्वरम् ॐ ग्रों अनंताय हलहस्ता
य नमः इति लोकेशपूजनम् तत्र रुद्रेशयम
नैर्ऋतयोः कलशद्वयं तरेच समं प्रणीतपा
त्रं स्थापयेत् तस्य पूजनमथे सर्ववह्निसंस्का
रस्थाने शर्णे समये लिख्यते तत्रास्य प्रयोजनं
ॐ वागीश्वर्याः कंकणमोक्षं करोमि स्वाहा श्रा
द्ध ततः प्राक्स्थापितकंकणद्वयं विष्टरे विमो
च्य ॐ ह्रौं अग्नेः निष्क्रामणं करोमि स्वाहा श्रा द्ध
एवमादित्यदर्शनम् ॐ ह्रां शिवाग्निर्भव नमः
इति विज्ञप्तिः ॐ ह्रं शिवाग्नये नमः इति पूजनं
ॐ हं शिवाग्नये स्वाहा श्रा द्ध ॐ ह्रं शिवाग्नये स्वा
हा श्रा द्ध एवमवान्तसंस्कारसहितो नामकर
णाख्यः संस्काराः ५ ततः परिधिपरिस्थापित
विष्टरेषु पूर्वे ॐ ब्रह्मणे नमः पूजा ॐ ब्रह्मणे
स्वाहा श्रा द्ध ब्रह्मन्नमस्यं पूर्वविष्टरं विसृज्य
दक्षिणे रुद्राय नमः पूजा ॐ रुद्राय स्वाहा श्रा
द्ध ॐ रुद्र त्वमस्यां दक्षिणविष्टरं विसृज्य पश्चि

मेविष्णवेनमः ॐविष्णवेस्वाहा श्रा ३ विष्णोरव
म्यताम् विष्टंरविमुच्य उत्तरेसदाशिवायनमः
ॐसदाशिवायस्वाहा श्रा ३ ॐसदाशिवक्षम्य
ताम् उत्तरविष्टंरविमुच्य ॐह्रूंवागीश्वर्यैनमः
इज्या ॐह्रूंवागीश्वर्यैस्वाहा श्रा ३ वागीश्वरिक्ष
म्यताम् सृष्टिस्थितिलयेदक्षेभोगमोक्षप्रदेशु
भे वागीश्वरिनमस्तेस्तुगच्छदेविमहाविष्टपम्
एवंब्रह्मादीन्वागीश्यान्तान्सर्वान्संपूज्यसंतर्प्य
विसर्जयेत ॐह्रूंशिवाग्निंतर्पयामिस्वाहा श्रा
२४ इतिप्राशनार्थमन्त्रे स्नन्तर्विंशत्यंगुलास
ह्वचोनिर्व्रणाः लीरवृत्तोक्ताकनिष्ठाधिकाः परि
धयोहस्तिकाः तदुक्तं श्रीस्वच्छन्दे स्रुवचस्रस
पत्राश्वत्थाः परिधयोमताः हस्तप्रमाणोद
्तार्थन्यसेद्दर्भोशिवानले याज्ञेयाश्चैवतोत
व्याश्चतविंशतिसंख्यया हस्तमात्रप्रमाणा
नाःशिवाग्नेस्तर्पणायवै समिधोयत्तवृत्तोत्त्या
स्सद्वचोनिर्व्रणाः शुभाः प्रादेशमात्राः स्थौल्ये
नकनिष्ठाभ्युपिकास्तयाः ताम्राग्नेर्दीमयेन्ना
म्याः सम्पसम्पवतानने अथस्रुवाङवसंस्काराः
ॐहूःफट्तापनंकरोमिफट् स्रुवाङवयोरग्नि

मभिअलंकृत्य शिवाग्नौ तापनम् शिवाम्भ
साप्रोक्षणम् ॐ हूं अवगुण्ठयामि हुं अवगुण्ठनं
अग्नौ त्रिर्भ्रामणम् पुनर्हः फट् प्रोक्षयामि फ
ट् शिवाम्भसा प्रोक्षणम् दर्भाग्रेणोदग्रस्पर्शः
पुनः प्रोक्षणं भ्रामणोन दर्भमध्येन तन्मध्यस्प
र्शः पुनर्भ्रामणं तापने पुनः प्रोक्षणम् मूले
न तन्मूलस्पर्शः पुनरग्निभ्रामणं प्रोक्षणं पुनः
स्ववामे अग्निदक्षोयोस्त्वौ संस्थाप्या शिवशक्ति
रूपो पूजयेत् ॐ शिवशक्तिभ्यां नमः इति पूज
नम् अथाज्यसंस्कारः आज्यस्याश्रयणं प्रस्तु
तस्य प्रोक्षितपात्रे स्थापनम् भांडे तापनेवा
द्वादशसंस्कारानाह ॐ हः फट् शिवाम्भसा प्रो
क्षणं १ ॐ हूं अवगुण्ठयामि हुं इति लिंगमुद्र
याऽवगुण्ठनम् २ ॐ हः फट् तापयामि नमः
शिवाग्नौ तापनम् दीप्त्यर्थम् ३ ॐ हूं उद्धास
नं करोमि हुं आग्नेयदिग्व्यग्नेर्धधारणं दीप्ति
स्फुटतार्थम् ४ ॐ हः फट् भ्रामयामि फट् इ
ति कुंडस्य परितोऽस्त्रेण त्रिर्भ्रामणम् योनौ स्था
पनम् ५ प्रादेशमात्रदर्भद्वयं नागपाशा
कारं करद्वयं गृहीत्वा मादायाज्यस्य त्रिर्वा

ंपराङ्मुखोन्नयनम् ॐ ह्रः फट् उत्स्रवनं
करोमि फट् इत्यसारभागापनयनं कुर्यात्
९ त्रिवारं पराङ्मुखोन्नयनम् ॐ ह्रः फट् सम्स्र
वनं करोमि फट् इति सारभागाहरणाय कु
र्यात् ७ दर्भोल्मुकं प्रज्वाल्य पात्रमीक्षीत तस्य
नेत्रतेजो निरीक्षणेन परतेजोमयमाज्यं कु
र्यात् इत्यवघातनं नाम संस्कारः तेनैव द
र्भोल्मुकेन सर्वतो विभ्रामितेन नीराजनं निः
शेषेण राजनम् नीराजनम् ॐ फट् नीराज
नं ९ तदेव दर्भोल्मुकं ॐ हूं पर्यग्नीकरणं
करोमि नमः इति वह्नौ क्षिपेत् इति तेजोम
यतापनाय पर्यग्नीकरणम् १० पुनः ॐ हूं ह्रः
फट् इति शिवाम्भसा प्रोक्षणम् ११ आज्यस्य
मूलेन सांगेन सांगन्यासामृतीकरणम् १२
संस्काराः १२ ततः प्रत्येकं तिलाहुतित्रिभि
स्त्रिभिर्यजेत् ॐ लं सद्योजातवक्त्रेण वं वाम
देववक्त्रमन्त्रसन्तर्पये स्वाहा आ ३ ॐ वं वामदे
ववक्त्रेण ॐ रं अघोरवक्त्रमन्त्रसन्तर्पये स्वाहा
आ ३ ॐ रं अघोरवक्त्रेण ॐ यं तत्पुरुषवक्त्रे
मन्त्रसन्तर्पये स्वाहा आ ३ ॐ यं तत्पुरुषवक्त्रे

कला
दी॰
प॰
40

ए ॐ हां ईशानवक्त्रमन्त्र सन्दधे स्वाहा आ व
प्रत्येकं तिलैः आ व ॐ ह्रूं नाडित्रयकल्पनां
करोमि नमः इति सर्वाग्रदर्भस्थयवलेपादाज्य
पात्रे नाडित्रयकल्पना तत्र मध्ये ह्रां इच्छा
शक्तये नमः ॐ ॐ वह्निपात्रे सुषुम्णायै नमः
स्ववामे ॐ ह्रीं क्रियाशक्तये नमः ॐ सः सोम
पात्रे इडायै नमः स्वदक्षे ॐ ह्रूं ज्ञानशक्त
ये नमः ॐ ह्रां सूर्यपात्रे पिंगलायै नमः ततो
वक्त्रेऽपि ह्रूं नाडित्रयकल्पनां करोमि नमः
इत्यूर्ध्वमुखं स्रुवं समिधाय हृदयेनाभ्यग्रे ॐ हूं उत्तमो
पेक्ष्यायेत् तत्र मध्ये ह्रां इच्छाशक्तये नमः
ॐ वह्निपात्रे सुषुम्णायै नमः ततः स्वदक्षे
वह्निवामे ॐ ह्रीं क्रियाशक्तये नमः ॐ सः
सोमपात्रे इडायै नमः ततः स्ववामे वह्निद
क्षे ॐ ह्रूं ज्ञानशक्तये नमः ॐ ह्रां सूर्यपात्रे
पिंगलायै नमः तत ॐ ह्रूं अग्नये स्वाहा आ
व इत्याज्यदक्षभागादग्निदक्षभागे ॐ ह्रूं
सोमाय स्वाहा आ व इत्याज्यवामभागाद
ग्निवामभागे आ व ॐ ह्रूं अग्नीषोमाभ्यां
स्वाहा आ व मध्ये इति शुक्लपक्षे अथ कृष्ण

पश्चे ॐ ह्रूं अग्नये स्वाहा आ २ इत्याज्यदक्षा
दग्निदक्षे ॐ ह्रूं सूर्याय स्वाहा आ २ इत्याज्य
वामादग्निवामे ॐ ह्रूं अग्निसूर्याभ्यां स्वाहा आ
२ मध्ये ॐ ह्रूं तेजोग्नये ईशानवक्त्रे प्राशनं करो
मि स्वाहा आ १ ॐ ह्रूं यं तत्पुरुषवक्त्रे प्राश
नं करोमि स्वाहा आ १ ॐ ह्रूं रं अग्नेः अघोरव
क्त्रे प्राशनं करोमि स्वाहा ॐ ह्रूं वं अग्नेः वाम
देववक्त्रे प्राशनं करोमि स्वाहा ॐ ह्रूं लं अ
ग्नेः सद्योजातवक्त्रे प्राशनं करोमि स्वाहा
ततः शिष्यं आज्यदर्शनं कारयेत् यथा
आज्यं तेजः समुद्दिष्टमाज्यं पापहरं परम्
आज्यं सुराणामाहार आज्ये लोकः प्रतिष्ठि
तः दिव्यान्तरिक्षभूमाद्यैर्यन्मे किल्बिषमा
गतम् तत्सर्वमाज्यसंस्पर्शान्निनाशमुप
गच्छतु आत्मनः गुणवृद्ध्यर्थं धर्मार्थका
ममोक्षार्थं च उपदीक्षानिमित्तमिदमाज्य
मर्पयामि नमः इत्याज्यदर्शनम् सर्वेषा
माशीर्वादः तिलकपुष्पं दद्यात् वध्नामि
कंकणं नैव दृढमतिर्भवभवोच्छित्तये भजानि च
णमचलममालिनममावायेह शाश्वतं स्थाने

कला
दी
४१
41

प्राणापानौचदक्षःश्रोत्रेघ्राणंमनःशिरोहस्तौ
प्रकृतावपियद्रूपांतंतत्रैदेवःशिवःपातु पा
पहारकोभगवान्शिवोस्तुशंकरःसर्वभूतगणाः
शांत्यैभवतुयत्नाहृदयेनारायणःपातु ततो
वामेवेटेत्यादिध्यानम् स्मृत्वाश्रणो ॐ हं
शिवाग्नेःचूर्णोघ्याव्रलचारितोताःसर्वसं
स्काराःसंस्रणाःसंतुस्वाहावौषट् इतिश्रणो
ततश्चर्वर्थमाग्निमुद्धृत्य ॐ हैं अवगुंठयामिह
मित्यवगुंठ्यस्नासाराहितंस्थापयेत् अग्न्यंतरे ख
रहेनाग्रपात्रेचमसेप्रणीतंकल्पयेत् कुष्मा
ततिलैर्मिश्रपवित्रवारिभरितम् स्वनाम
पदसंयुक्तं स्वध्यानेननमोंतगम् शंखचक्र
गदापद्मैर्भूषितंचचतुर्भुजम् श्रीवत्सकौस्तु
भोरस्कं वनमालाविभूषितम् श्रियायुतंस
दाध्यायेच्चमसेविष्णुमव्ययम् विष्णुपीठा
यविद्महे विष्णुध्यानायधीमहि तन्नोविष्णुः
प्रचोदयात् ॐ भगवान्विष्णोआगच्छागच्छ
एवंसंतिष्ठ २ सन्निधत्स्व २ सन्निरुद्धोभव २
सन्निहितोभव २ भोःस्वागतंभोस्ततोविष्व
र्येपात्रात् ॐ हंहंहंभोविष्णोपाद्यंगृहाण

नमः अर्घ्यंशङ्खाणाम्आचमनीयंसमालभनं
पुष्पंधूपंदीपं ॐह्रूंविस्रवेनमः सृजनम् त
तोविज्ञापयेत् पश्चार्घ्यंयत्तआरभ्यआत्मार्घ्यं
वापिसाधकैः भगवंस्त्वत्प्रसादेनयागोनिर्वि
घ्नतास्तुनः ततश्चण्डतोरजातंचण्डतोरीशाने
भ्यर्च्यवक्त्रंसंकल्प्य स्वर्वादौवक्त्रौजिह्वाःसृज
येत् ॐराज्यार्घायैनमः ॐदारुजनन्यैनमः
ॐस्वस्त्रदायैनमः ॐशत्रुकारिण्यैनमः ॐव
शीकर्ष्यैनमः ॐउच्चाटन्यैनमः ॐधनदायै
नमः ॐमुक्तिदायैनमः इत्यैशानान्तम् ॐ
सर्वसिद्धिप्रदायैनमः मध्ये एवंसंपूज्यैके
कयाहुत्यासाङ्गान्तंहोमयेत् ततःपूर्णा ॐह्रूं
अग्नेर्जिह्वाःकल्पयामिवौषट् ततोद्वितीया
ॐह्रूंअग्नेर्जिह्वासन्निधिरस्तुवौषट् इतिद्वि
तीया ततोवह्निचैतन्यनयाकल्पितंज्वाला
ग्रं ॐह्रींसंरक्षामिनमः इतितर्जन्याकुटिली
कृतयाज्वालाग्रंसंरक्ष्यवामनासापुटेनपूर
केनसीकृत्यहृद्गतंचैतन्यानलैकीभावेन
भैरवीकृत्यब्रह्मरंध्रंगच्छेत् तस्मान्नेगयेत्द्वि
स्तनीडगथ्यानस्याःलीरनिर्मथ्यरुविरंहते

कला
दी
४२
42

निर्गतं विभाव्य तद्धृतं गृहीत्वा हृदयमवकृष्य
वामाग्निज्वालैकीकृते चैतन्यानले हृदि मन
त्राक्षयोरभेदेन स्वाहान्ते तद्धोमं विधाय तत
ऽङ्कूं यमो धर्मेन्द्रविदीमेऽन्तात्मा मीमनसा हृच्चा
स्वयमागावर्मेनानित्यमलहृत्मोर्जेहोम्य हूं स्वा
हावौषट् एवं मानसिके होमं विधाय चैतन्या
नले भैरवीक्रियते यथा वामेवेटेतिध्यानेन
भैरवरूपं चैतन्यानले हृन्त्यमेस्मृत्वा मानसैः
पंचोपचारैः संपूज्य वागेशरीरे वक्त्रं गन्धासं
कृत्वा वागवक्त्रैरपि स्वदेहस्यापि भैरवता
क्रियते तस्य वागवक्त्रैः सर्वसिद्धिप्रदानाख्ये
मध्यजिह्वाग्रसारिणोस्तनपदे चिंतयेत्तद्यथा
योगपीठमनंतादि सदाशिवान्तमासनं परि
कल्पयेत् प्राग्वत्कल्पयेत् गंकारेण नाभौ
कन्दहृदयावधि नालं हृदये पद्मासितमष्ट
पत्रं धर्मादिचरणं सिंहासनमेतासनं तत्वा
एववक्त्रो विभाव्य अग्निं हृं सात्त्वेरण कल्पयि
तानिष्कलेन प्राग्हृदि निवेशितां ज्वालां हृद
यादुन्मूल्य दक्षिणनासापुटे नरेचकेनस्व
वर्णावदातां सुखावादाय वागवक्त्रो भावि

तासनोपरिनिक्षिपेत् एवमेवाग्निमूर्तिर्भैर
वात्मिकामवेदित्यमष्टात्रिंशकलात्मिकंमू
र्तिभूतेवक्त्रंप्रकल्प्यशोध्याध्वन्यासंकृत्वावा
मेवेदेतिध्यानेनभैरववक्त्रंपंचवक्त्रंस्मृतासन
यास्थूलेनसललाटेतिलकंकृत्वा वक्त्रोपमा
मेडलपूजांदिक्ष्वात्रद्वारगणेश यहग्रुरुस्रा
यारुशास्त्रासनपद्मंसंपूज्यभगवंतंसांग
वक्त्रंसावरणंविशेषावरणयुतसब्रह्या
दिमात्र्यष्टकसार्धषट्कंसतेत्रेशंचपूज्य
विध्यर्घपात्रात्नाचादिदत्वाग्न्याज्याहुतिभि
भिरग्निभिर्वक्त्रजिह्वान्नसंधानंकुर्यात् ॐलं
सद्योजाताख्यभैरववक्त्रंशिवाग्निसद्योजा
तवक्त्रेनुसन्दधेस्वाहा श्री २ एवमन्येषां
स्वस्वमंत्रपरामर्षण यथा ॐवंवामदेवा
ख्यभैरववक्त्रंशिवाग्निर्वामदेववक्त्रेनुसन्
धेस्वाहा श्री २ ॐरंअघोराख्यभैरववक्त्रंशि
वाग्न्यघोरवक्त्रेनुसन्धेस्वाहा श्री २ ॐयं
तत्पुरुषाख्यभैरववक्त्रंशिवाग्नितत्पुरुषभैर
ववक्त्रेनुसन्धेस्वाहा श्री २ ॐहंईशानाख्य
भैरववक्त्रंशिवाग्नीशानवक्त्रेनुसन्धेस्वाहा

कला
दी
५२
43

श्रा २ स्वस्वमंत्रपदामर्षेणयथा ॐ लं सद्यो
जाताख्यभैरववक्त्रजिह्वांशिवाग्निसद्योजात
वक्त्रजिह्वायामन्त्रसन्दधे स्वाहा श्रा २ ॐ वं
वामदेवाख्यभैरववक्त्रजिह्वांशिवाग्निवक्त्रजि
ह्वायामन्त्रसन्दधे स्वाहा श्रा २ ॐ रं अघोराख्य
भैरववक्त्रजिह्वांशिवाग्न्यघोरवक्त्रजिह्वायाम
न्त्रसन्दधे स्वाहा श्रा २ ॐ यं तत्पुरुषाख्यभैरव
वक्त्रजिह्वांशिवाग्नितत्पुरुषवक्त्रजिह्वायाम
न्त्रसन्दधे स्वाहा श्रा २ ॐ लं ईशानाख्यभैरव
वक्त्रशिवाग्निईशानवक्त्रजिह्वायामन्त्रसन्द
धे स्वाहा श्रा २ इतिवक्त्रजिह्वानुसंधानम्
अथ नाडीसन्धानम् आदौ स्वात्मानं शिवाग्निं
चैकमेव विभाव्य ॐ हूं निर्गच्छामि नमः २
त्यग्नेर्भावनया हृदयाद्वामनासापुटेनिर्गत्य
स्थंडिलेशस्यदक्षिणेनप्रविश्यावरणात्येवप्र
वेशनिर्गमनक्रमेणवक्त्रेदक्षिणेनप्रविशेदि
तिनाडीसन्धानम् ततोऽग्निदीप्त्यर्थंसमिद्धोम
माहुतिसप्तभिः कुर्यात् तत्राघोरस्यसमिधः
७ निष्कलस्य ७ अघोरीश्वर्याः ७ वक्त्रांगभै
रवलोकपालादीनामेकैका गणेशादीनां

तिस्त्रस्तिस्रः प्रभावादेकैकावा ततोऽत्र ग्रहाभि
मुखीकरणोपाज्याद्युतिशत महेश्वरमूलस्य द
शांशं वक्त्राङ्गाणां भैरवलोकपालानां च तद्दद्वा
भैरवादर्धं भैरवबद्दाहोमयेत् यदि दिनस्याधि
क्यं तदा गणेशादीनामन्नादिद्रव्यहोमो कुर्यात्
स्वल्पदिनशेषे सत्येतावदेव ततः पूर्णात्रयं द
द्यात् ॐ ह्रूं सर्वमन्त्रचक्रतृप्तिरस्तु स्वाहा वौष
ट् इत्येका ॐ ह्रूं भैरवाप्यायनमस्तु स्वाहा वौ
षट् इति द्वितीया ॐ ह्रूं न्यूनातिरिक्तविधिं पूर
यामि वौषट् इति तृतीया पूर्णा ततोऽन्यमग्निमा
नीय वैश्वदेवं कृत्वा नैवेद्यं निवेद्य द्वादशदेव
तादिकृत्वा गुरुपूजनं कुर्यात् यथा नमस्ते शा
येत्यादि अन्याश्च गाथाः पठेत् अद्य तावत्
अमुकतिथौ गुरोः शिवस्य तथा पूर्वोक्तकलश
यागार्चितदेवतानां दीक्षाफलप्राप्त्यर्थं गुरुपू
जनं करिष्ये एवं क्रमेणासनादिदक्षिणान्तं
तावत् यथोक्तां पूजां कुर्यात् क्षेत्रेशादिबलिं भू
ततर्पणादि कृत्वाचम्य ॐ ह्रूं न्यूनाधिकान्यथा
कृतमायाक्षिप्तानि ज्ञानिर्विधि पूरणं चास्तु स्वाहा
वौषट् इति पूर्णां दत्वा निरोधार्घं दत्वादि नं त

येत् तत्र प्रसंगान्नैवेद्यप्रकारं लिख्यते घारि
कं वटकांश्चैव षष्कुलीमोदकांस्तथा खंडलड्डु
शरावानि भक्ष्याणि विविधानि च शाल्योदनं
शुद्धं सूपमाज्याढ्यं सम्प्रकल्पयेत् कोशल्यामेरु
काश्यपांस्तथा तोदशिरांसि च हनाकांशि
लुकांश्चैव लवणान्यपि कल्पयेत् एवं देशान्य
नेकानि कटूनि मधुराणि च रसालां च दधि क्षी
रं पानकं विविधं तथा मत्स्यमांसान्यनेकानि
लेह्यपेयानि यानि च अग्रमाहरयेच्छंभो वि
मशाठ्यविवर्जितः यद्यत्किंचिन्मनसाह्लादि
तन्नयुक्तं वा न संधाय यदर्णम् विद्याभेदाद्भव
वेकात्मता स्मिन्हासिद्धार्वै याञ्चिलीने विद
ध्यात् इति नैवेद्यरहस्यम् एवमन्तरान्त्रास्मिंल
दभावेश्वाति तन्मनसा स्मरेत् मांसमत्स्यपा
नकान्यवश्यमानयेत् विधिहीनं न कर्तव्य
मविरात्सिद्धिमाप्नुयात् दिव्याभोगाः समप्ना
तिरजोहीनं महद्भयम् पुष्पहीने हंति शिष्यं
मेवहीनं गुरुं हरेत् तोयहीने धनहानिर्धूत
हीने धनक्षयः नैवेद्यार्घ्यादिहीने चंडमिर्दं
जायते ध्रुवम् उपहारं विना मन्त्रस्त्रोरायेम

यमादिशेत् पानकामिषनिर्मुक्तं सर्वजीवि
तनाशनम् कलहं दीपहीने च राष्ट्रभंगं तिला
ह्रतेः व्याधिस्तदा हीणाहीने दीपहीने तु नि
ष्फलम् तस्माद्देभिः प्रयत्नेन ततो दीक्षां समा
चरेत् अथान्यशास्त्राभिप्रायः रजोविना तु शि
ष्यस्य समये व्यभिचारणम् बल्योपहाररहितं
दारिद्र्यं कुरुते भृशम् मत्स्यामिषविनिर्मुक्तं
सर्वजीवितनाशनम् रूपदीपादिरहितं अ
न्यधर्मप्रकारणम् द्रुति द्रव्यविहीनं यत्लोक
विद्वेषकारकम् सा दीक्षा निष्फला ज्ञेया पवि
त्रारोहणे विना भुक्त्यर्थं तु विधिर्देवमादिवा
सेन वर्णितः नैष्ठिकानां प्रवक्ष्यामि आचारस्य
तु लक्षणम् वास्तुयागस्य कंदाने च परीक्षार
जो विधिः स्थानाश्रयो यज्ञो यागो न तेषां की
र्तितो मया अलं बहुना ॥ ॐ श्रीगणेशाय
नमः श्रीगुरुभ्यो नमः अथ प्रातः नैमित्तिकं
कृत्वा संक्षेपेण कलशमंडलार्चां देवेशार्चां च
विधाय गडादिना वा मिष्टेन देवेशान्संतर्प्य
च मुकुंड समीपं यायात् उपविश्य आत्मा
सनाय नमः इत्यासने पुष्पं दत्वा ॐ हः फट्

कला
दी
५५
45

षट्त्रिंशत्तत्त्वमयाय ज्ञानात्वेङ्कृत्पिठोऽपद्मा
मायनमः इत्युपद्मामपूजा स्वदक्षे स्वार्घ्यपात्रं
संपूज्य विधिनिरोधपञ्चपात्रत्रयं च संपूज्य
शिवाम्बु च संपूज्य ॐहे ॐ प्रभामण्डलाय नमः
द्वारेभ्यो नमः ॐ उं मध्ये योगपीठासनाय न
मः तत्र शिवं सावरणं संपूज्य ॐ डां हु हिर्ज्वा
लालिंगोपरि कलशे ॐ ह्रूं शान्तिकुंभाय नमः
ततः पूर्वादिक्रमेण लोकेशार्चां कृत्वा स्ववा
मे कुशास्तंभे ॐ ह्रूं ब्रह्मणे नमः स्वदक्षे च म
ध्ये पात्रे ॐ ह्रूं विष्णवे नमः इत्यं पूजां विधाय
ततस्तिलैः ॐ ह्रूं ब्रह्मणे स्वाहा श्रा ३ ॐ ह्रूं
विष्णवे स्वाहा श्रा ३ ॐ ह्रूं रुद्राय स्वाहा श्रा ३
ॐ ह्रूं ईश्वराय स्वाहा श्रा ३ ॐ ह्रूं सदाशिवाय
स्वाहा श्रा ३ ततो नैमित्तिकविधानाय तिलैः
ॐ ह्रूं भैरवशिवायोः सन्निधानं कुरु स्वाहा इति
सहस्रं वा शतं हुत्वा स्रुक्स्रुवाज्यसंस्कारान्वि
धाय यजमानं सपरिवारमाज्यदर्शनं कार
यित्वा तेषां पूर्ववत् कंकणं बद्ध्वा आशीर्वादं
तिलकपुष्पं दत्वा आज्येन ॐ ह्रूं अग्नये स्वाहा
श्रा ३ ॐ ह्रूं भैरवशिवाग्नौ सन्निधानमस्त्वा

ह्रा वौषट् इति शर्णाः ततः पुरोडाशं मत्स्यं च
रुसहितं मानीय तस्य संपातः ॐ ह्रूं संपातेक
रोमि स्वाहेत्यग्नौ हुत्वा ति चरौ आहुतीः ३ एवं सं
पातं कृत्वा कलशमंडलयागाग्नीनां नैवेद्यं नि
वेदयेत् एषदीक्षाकर्मांतं प्रारंभसमये प्रत्यहं
विधिः तत्रैतद्दिवसवर्जमन्यदिनेषु महाहोमोपि
कार्यः ॐ ह्रूं अमुकस्य दीक्षाविधौ सर्वमंत्रसन्नि
धानमस्तु वौषट् इति अन्नहोमांते शर्णाः आसि
त्रिवसे महाहोमस्य न संप्रयोगः अन्नतीरचरोः हो
मएव अथात्र चरुसमाचारणविधिः तत्र स्था
लीं निर्गुणां शिवांभसा प्रक्षाल्य ॐ ह्रैं अवगुंठ
यामि नमः इत्यवगुंठ्य ॐ ह्रीं स्थाल्यै षड्रसा
पाद्यै नमः इति चंदनाद्यैरर्चयित्वा सद्धूपे
न धूपयेत् ॐ ह्रैं स्थाल्या गलके सूत्रं बध्नामि हूं
नम इति गलसूत्रं बध्नीयात् सदर्भासनमंडले शि
वांभः प्रोक्षिते कवचावगुंठिते नेत्रादीशिवांत
मासनं न्यस्य तदुपरि शक्तिभूतां स्थालीं संस्थाप्य
तस्यां स्थालीं संस्थाप्य तत्रास्यां भैरवं सब्रह्मत्रि
रावरणम् ब्रह्मावरणं भैरवावरणं सास्त्रलोक
पालावरणं चेति त्रिरावरणम् मनसा पूजयेत्

कला॰
दी
४८
46

ततः शिवहस्तेचुल्यांप्रत्यग्वादक्षिणावक्त्रायांॐ
उसंस्कारः ॐ ह्रः फट् चुल्लीं प्रोक्षयामि फट् पं
चगव्येन प्रोक्षणम् ॐ ह्रः फट् चुल्ल्या उल्लेखना
दिकरोमि फट् ॐ ह्रीं चुल्ल्यै नमः इजनम् वि
ध्यर्चं पात्रात्मायादि प्राग्दक्षिणमग्निं चुल्ल्यां क्षि
पेत् ॐ ह्रः फट् चुल्ल्यग्निमास्तरणामि फट् इति
कुंडवत्स्तरन्यासः ॐ ह्रः फट् चुल्ल्यग्निं परिसमु
ह्यामि फट् एवं पर्युक्ष्यामि परिषिंचामि अस्त्रा
र्घपात्रतः कुर्यात् ॐ ह्रूं चुल्ल्याग्निं तर्पयामि स्वाहा
श्रा १॰ ततस्तां स्थालीं चुल्ल्युपर्यारोपयेत् तस्यां स्था
लीसंदीप्यमानहृदयेन जलमेकेन क्षीरं ॐ हैं जल
क्षीरे स्थाल्यां क्षिपामि ॐ नम इति स्थाल्यन्नं क्षिपे
त् ऋतास्त्रिः सफलीकृततंडुलाप्रसृतित्रयं त्रयं
प्रत्येकस्य शिष्यस्य कृते होमार्थमेकानेव यार्थ
मेकाचेत्येके शिष्यविषये प्रसृतिपंचकं तथैवा
धिकानेत्रयं त्रयमधिकं कल्पयेत् ॐ ह्रः फट्
तंडुलं क्षालयामि फट् इति त्रिवारं त्रिवारं प्रक्षा
ल्य स्थाल्यां क्षिपेत् शिवांभसा संप्रोक्ष्य स्थलेना
ष्टोत्तरशतं जप्त्वा समाहितः एकचित्तः शनैः श
नैः पचेत् ॐ हैं क्रियाशक्त्यात्मिकां दर्वीं वेष्टया

मिॐनमः इतिदर्भाःस्तरेवध्नीयात् ॐह्रः
फट्चालनोद्घाटनेकरोमिफट् इतिचालनो
द्घाटनादीनिकारयेत् तत्रामेरोगभयंज्ञेयं
दग्धेमरणभयंतथेतिविचिंत्यसप्तकृत्वापचे
त् ततोर्धसिद्धेचरौतन्माभिघारंमग्निव्याप्त्या
चैवंस्रुतसेचनोद्दीपनात्मकमाखिलतादोषोप
शमायांगेराद्दतित्रयंस्रुवेणचरावेवक्षिपेत्
तन्मो तद्यथा ॐह्रांस्रततमोभवस्वाहा श्रा २
ॐह्रींस्रततमोभवस्वाहा श्रा २ ॐह्रूंस्रततमोभ
वस्वाहा श्रा २ ॐह्रैंस्रततमोभवस्वाहा श्रा २
ॐह्रौंस्रततमोभवस्वाहा श्रा २ ॐह्रःस्रततमोभ
वस्वाहा श्रा २ इत्याहुतिषट्दशकंचरावेव
क्षिपेत् ततोश्मोर्क्कउदक्षेस्ववामेसदर्भमंड
ले ॐह्रूंस्थालीमवतारयामिनमः इतिस्था
लीमवतार्य शीताज्ञारःसोमव्याप्यातिखिन्न
भादोषोपशमायमूलेनषडंगेनवषड्जातियु
तेनैकैकयाहुत्यासेतिचरोहूत्यन्नावनेनप्र
कारेणकुर्यात् ॐह्रूंस्रशीतोभववषट्स्वाहा
चरोहुत्यगोह्रांस्रशीतोभववषट्स्वाहा
१ ॐह्रींस्रशीतोभववषट्स्वाहा ॐह्रःस्रशी

कला
दी॰
४७
47

तोभव वषट् स्वाहा श्रा १ ततः स्वदक्षे कुंडस
मीपे मंडलके सदर्भे ॐ आधारशक्तये योगपी
ठासनाय नमः ततः स्थालीवक्षो भ्रामयित्वा
मंडलोपरि संस्थाप्य निष्कलेन सांगेन सवक्के
नैकैकयाहुत्या संपातं कुर्यात् तद्यथा ॐ हूं
संपातं करोमि स्वाहा इत्यो ह्रा इति चरौ एवं ॐ
ह्रां ह्रीं हूं हैं ह्रौं ह्रः हं संपातं करोमि स्वाह इत्यो
ह्रा इति चरौ श्रा १ एवं यं रं वं लं इति संपातः
श्रा १ पुनर्निष्कलेनाष्टोत्तरशतेन जप्त्वाज्याहु
तिं क्षिपेत् परमामृतमन्त्रं स्मरन् इत्यग्नीषोमा
त्मकश्चरुर्भवेत् इति चरुसाधनम् करणी
त्वदिकारजः कर्तव्योज्यतिलादीनां मूलेनैव सं
पातं कृत्वा चरुं त्रिधा विभज्य कुंभस्थंडिल
वह्निस्थाय विभवेश्यो भागं ॐ ठः ठः इत्यग्निपि
णी ठः ठः इति निवेदयेत् तत्रवित्तनैवेद्यं वि
शेषः चरुं पात्रे तु संरक्षयेद्भैरवेन त
त्पुष्पधूपादिभिर्नीत्वा याम्ये तन्निवेदयेत् ॐ
हूं परमामृतरूपं विभावे चरुं निवेदयामि न
मः ततो दशांशसावरणेभ्यो निवेदयेत् द्वि
तीयं भागं वक्ष्ये मूलानां शतेदशांशभोगैः स्व

चाह्रोमयेत् तस्मात्तृतीयंभागंगुरुःशिष्ययोः
कृत्वेसराहितंस्थापयेत् ततोहोमः भैरवस्य
शतंहोमस्यमंगानांतद्दशांशकम् ततोहोमःव
ह्निर्यथा ॐगंविनायकायस्वाहा श्रा १०।
१०८ ॐह्रांभूतधात्र्यैस्वाहा श्रा १०।१०८ ॐश्रीं
श्रियैस्वाहा श्रा १०।१०८ ॐह्रूंभैरवंतर्पयामि
स्वाहा श्रा १० ॐह्रूंसमष्टिरस्तुस्वाहा श्राद्दती
र्दश १० ॐह्रूंवास्तुपुरुषायस्वाहा १० ततोधि
वासेष्टोत्तरशतंयथा ॐह्रूंअधिवाससिद्धिर
स्तुस्वाहा १०८ ॐह्रूंच गणेशश्चाग्नियोःकुंभस्थ
डिलानुत्रयस्यषट् होमान्निर्वर्त्यकवीतसम
ममधिवासने पत्रामध्यात् विनायकश्चाग्नि
योश्चअधिवासस्यस्थापने प्रायश्चित्तेचहोतव्य
मष्टोत्तरशतंशतम् दशादशाहुतीर्दद्याच्छे
षाणिभिविनिश्चयः श्रीपूर्वेमालिनीविजये ॐ
ह्रूंशिवसद्भावायस्वाहा श्रा २ ॐह्रूं
ले नवात्मभैरवायस्वाहा श्रा २ ॐह्रूं
रतिशेखरभैरवायस्वाहा श्रा २ ॐफ्रीं
ह्रूंफट् अपरायैस्वाहा श्रा २ ॐफ्रीं
सौःपरायैस्वाहा श्रा २ ॐअघोरफ्रींप

ह्रूं मे ल व यु के

कला
दी॰
४८
48

रमघोरेह्रूंघोरतरेपेहूः घोरघोरेभीमभीषणे
वमवमपिबपिबह्रेह्रेरुरुररफट्ह्रूंहूःफ
ट् परापरायैस्वाहा श्रा २ इतिशादीनांहोमः
ॐमातृसद्भावायैस्वाहा श्रा २ ततश्चाङ्गति
त्रयेणत्रयेणगणेशादीनांहोमः ॐह्रांवटु
केस्वाहा श्रा २ ॐह्रांवास्तुपुरुषायस्वाहा श्रा
२ ॐश्रींश्रींश्रींह्रूंह्रूंह्रूंफ्रींफ्रींफ्रींविलोमशां
तिरस्तुस्वाहा श्रा २ एवंव्युत्क्रमशांतिरस्तुस्वा
हा श्रा २ न्यूनातिरिक्तदोषशांतिः अकृततु
कृतशांतिः ततः पूजा ॐह्रूंअधिवाससिद्धि
रस्तुवौषट् इतिपूर्णा तथाचश्रीमतंत्रे अनु
लोमविलोमन्यूनातिरेकाणांचप्रायश्चित्तार्थं
जुहोमिस्वाहा श्रा १०८ एवंवौषडंतेनपूर्णा
इत्यधिवासारंभः अथशिष्यसंस्कारः तत्रके
भेयागवेदौचभैरवंपूजयित्वाकलशस्यशांतंकृ
त्वा पूर्णांचदत्वागुरुर्यागवेदिसमीपंप्रवि
श्य तत्रोपविश्य विधिनिरोधपश्चाच्छिवाम्बु
पात्रंचतत्पूर्वंसम्पूज्यात्रोपविष्टंशिष्यंस्पृष्ट्वा
संपूज्य जानुनीभूतलेकृत्वाञ्जलिंप्रार्थयेत्
यथा पूर्वमेवतयाशंभोनियुक्तोहंशिवाध्वरे

गुरुः परापरेच्छितात्मा लोकानुग्रहकृद्व त्वद्
भक्ताज्ञानच्छेदयोगे भगवन्मस्तको मया दृष्टस्ततो
ऽनुग्रहाय मच्छिष्योऽहं न लोभतः त्वमेव चात्र भगव
न्प्रमाणं सर्वकर्मणाम् साक्षिभूतः स्वयं कर्ता
परमः शंकरः शिवः तद्विशेषेण मामेव समधि
ष्ठाय सन्निधिम् विधत्स्व येन त्वत्पादसमानक्रि
यतामिमाम् त्वदाज्ञा हृदये कृत्वा करोमि नि
खिलाः क्रियाः अन्यथा कर्तुमीशा हि विघ्नेशा
अपि किं प्रभोः त्वदादेशान्दीक्षणीयः शक्त्या
विष्टो मयाणुकः विभो त्वं वेदयिष्यामि यद्य
कर्म करोम्यहम् देवाज्ञां मे जगन्नाथ प्रसीद भ
गवन्मम इति गृहीताज्ञः ततो यागगृहाद्बहिः
द्वारि मंडलकं कुर्यात् यदि तत्र स्थाने नास्ति
यागमंडपान्तरे द्वारिसमीपे मंडलं कुर्यादेवं
विचार्य मंडलं कृत्वा दर्भोपरि शिष्यमुपोषि
तं सौम्यास्यमुपस्थितं प्रसन्नवदने गुरुः पूर्वाभि
मुखः कल्पस्थानोत्थितार्घाम्भसोक्ष ओं हः फ
ट् प्रोक्षयामि नमः शिवाम्भसा संप्रोक्ष्य ओं ह्रूं
अवगुण्ठयामि ह्रूं नमः अवगुण्ठ्य ज्ञानखड्गे
नाशिखासिच्छिरात्ताडूपानिर्बीजपत्रकेनेष्टिकं म

स्मनानाज्ञस्त्रयोर्थशैवरन्ध्रैर्दर्भैः ॐ ह्रः फट् इ
च्छाशक्तिमुद्दीपयामि फट् एवं क्रियाशक्तिं ज्ञा
नशक्तिमिति त्रिर्नाभेः शिरोन्तं स्पृशेत् तान्दर्भान्
ग्नौ क्षिपेत् पुनरपराग्रैर्दर्भैः ॐ ह्रः फट् आणवं पा
शं दलयामि फट् ॐ ह्रः फट् मायीयं पाशं एवं का
र्मणमिति त्रिर्नाभेः पदान्तं स्पृशेत् तांश्चाग्नौ क्षिपेत्
पाशशैथिल्याय शक्तित्रयोद्दीपनाय च कुर्यादिति
गुरवः ततः शिष्यं सांगं न्यस्य मूलेन तं शिष्यं स्नापये
त् अस्त्रनेत्रपदं हृद्गिरा हन्ते ॐ ह्रः फट् प्रोक्षयामि फ
ट् इत्यस्त्राम्भसा प्रोक्षितम् ॐ ह्रूं अवगुण्ठयामि
नमः इत्यवगुण्ठितम् सम्पूजितं मूलार्चितं कृत्वा
ऐं ऐं ह्रं अमुकस्य नेत्रपटं बध्नामि ह्रौं वौषट् नमः
करणबहिः प्रसरद्रूपभैरवप्रकाशसङ्कोचीक
रणाय बुद्धीन्द्रियाश्रयस्यावोच्छादनाय नेत्रयो
र्बध्नीयात् ततः कर्मेन्द्रियप्रधानपाणिहृदयावष्ट
म्भेन शिष्यमतः कलशवेदिसमीपं प्रवेशयेत्
देवाभिमुखं कृत्वाचम्य स्थलेनैकमेव पुष्पं पाणौ
दत्वा स्थण्डिले प्रक्षेपयेत् तत्पातात्तावत्स्मरेद्गुरुर्मू
लमन्त्रमुदीरयेत् ततोऽस्य नेत्रपटमुन्मूल्य कल
शार्चितमन्त्रबृन्दं दर्शयित्वा तं दण्डप्रणतिं का

रयेत् तत्रस्थाप्य वह्निनेत्रपटं यागवेद्यग्रमेव
मेवनीत्वा नेत्रपटमुन्मोच्य स्थंडिलपूजितमंत्र
देवं दर्शयित्वा तं दंडप्रणतिं कारयेत् नमोस्तु
सर्वयोगिभ्यः सिद्धेभ्यश्च नमो नमः मूर्तामूर्तेभ्य
योगात्मनमः शक्तिगणेभ्यस्ते एवमुक्त्वा प्रणम्य
तत्र यागवेदिसमीपे निजदक्षिणतः दर्भमंडले
शिष्यमुदग्वदनमुपवेश्य तान्वैर्विधैश्च प्रोक्ष
णादि कुर्यात् यदि संकटत्वाद्यागवेद्यग्रे स्थानं
नास्ति तदाग्निसमीपमेव नयेदेवं विचार्य निज
दक्षिणतः दर्भमंडले शिष्यमुदग्वदनमुपवे
श्य पूर्ववत्ताडनविध्यर्घ्यप्रोक्षणादि कृत्वा विशे
षफलार्थिनः सकलीकरणमित्थं कुर्यात् तद्य
था विशेषफलार्थिनो गुरुरात्मीयो करोऽंगं पादि
ग्यो कृत्वा स्वात्मनि वक्त्रां गत्वा पूर्ववत्स्वमन्त्रं न्यस्य
परं ज्योतिर्मयेत् प्राणभ्यां शिष्यं संवीत्य रेचकेन
शिष्यहृदयं प्रविश्य तस्य हृदयात्तदात्मानं द्वाद
शान्तं प्रापय्य स्वकायपूगे वस्याप्यशोषणादीनि शि
ष्यस्य कुर्यात् तद्यथा ॐ ह्रूं शिष्यतत्त्वं शोषयामि
नमः सूर्यरूपं प्रणवं ह्रूं संचिन्त्य शरीरं शोषये
त् ॐ ह्रूं शिष्यतत्त्वं दाहयामि नमः दक्षिणपादांग

ष्टेन कालाग्निं ध्यात्वा भस्मीभूतं भावयेत् ॐ हुं
शिष्यतनुं उत्प्लवनीकरोमि नमः शारीरं भस्म
दिग्गतं भावयेत् ॐ वं शिष्यतनुमाप्लावयामि
नमः तस्यानेन क्षालितं भावयेत् इति तनुं संशो
ध्य व्योमवस्थितं ये देहे चैतन्यं कनकाग्निवदिति
नीत्वा व्योम्नि शून्ये जीवं तन्निशाकारं भावयेत्
पुनर्बैन्दवामृतसम्पूर्णं तन्तुं हृदि व्यां विभाव्य शा
न्तं तरोक्तनीत्या शिष्यस्य कन्दाधः शक्तिमाधा
रिकां नाभौ धात्रीं तदुपरि कल्पनापदे पयोराशिं
हृदि पद्मं वह्निः सत्वयात्र चंद्रमंडलवेष्टितमका
रोकारमकारात्मकं विद्याशिवतत्त्वं व्याप्तदलके
सरकर्णिकं विद्येशपद्मं मंत्रकेसरं वामादिनव
बीजतत्त्वं शक्तिकर्णिकं विद्याब्जं भावयेत् स्व
च्छन्दोक्तनीत्याः कन्दाधः शक्तिं न्यस्य तदुपरि क
मलं ॐ हूं हां हूं शिष्यात्मानमवतारयामि नमः
इति शिष्यजीवं द्वादशान्तादवतार्य कमलोपरि
शिष्यात्मानं ज्योतिर्मयं ध्यात्वा ॐ लं सद्योजात
मूर्तये नमः इति मूर्तिभूतं प्रकल्प्यामृताप्लावे
नाप्याययेत् शिवीभूतस्य शिष्यात्मनो मनसा
न्यासं कुर्यात् आदौ वक्त्रन्यासं अंगन्यासं संदेपे

नकलान्यासंकुर्यात् आदौवक्त्रन्यासं) ओं हं
तारादिभ्यः ईशानकलाभ्यो नमः ५ मूर्ध्नि ओं
यं शान्तादिभ्यस्तत्पुरुषकलाभ्यो नमः वक्त्रे ४
ओं रं उमादिभ्यः अघोरकलाभ्यो नमः हृदि ८ ओं र
जादिभ्यः वामदेवकलाभ्यो नमः गुह्ये १३ ओं लं
सिद्धादिभ्यः सद्योजातकलाभ्यो नमः ८ पादयोः
इति सकलदेहे च एवं मनसा न्यासं कृत्वा शोध्या
ध्वन्यासं मनसा कुर्यात् तत्र कलादीक्षायां पंचक
लाः ओं हः शान्त्यतीतायै नमः मूर्ध्नि ओं हें शान्तायै
नमः वक्त्रे एवं ओं हूं विद्यायै नमः तालुनि ओं ह्रीं
प्रतिष्ठायै नमः नाभौ ओं ह्रां निवृत्त्यै नमः पादांगुष्ठे
स्फाटिका च तथा कृसारक्ता शुक्ला पीतकाः शान्त्य
तीतादिका ज्ञेयास्तत्त्वभूतास्तु ताः कलाः ततो वा
ऽऽशिष्य देहे शोध्याध्वन्यासं कुर्यात् तत्र कला
दीक्षायां पंचकलाः गर्भीकृतेन ताध्वपंचकाः
सृष्टिक्रमेण न्यसेत् न्यासः सृष्टिक्रमात् मोक्षः शो
धनं तत्त्व्ययक्रमादिति श्रुतेः तत्र करं ध्याहल्ला
दान्तं शान्त्यतीताकला तस्या मंडलं वृत्तं विन्दुला
ञ्छितं स्फाटिकाभं ध्यानमेकास्यं वरदाभयपाणिं
तस्या मन्त्रस्तत्त्वमेकं शिवतत्त्वं तत्र समनान्तो

ऐन्दुविंदुलक्ष्यात्मिकं भूमिका प्रमेयरूपं भुवने षो
डशकं तत्र समनायां महामायारूपायां तच्छक्ति
मारूढः पंचविधकृत्यकारी शिवः तद्भुवनम्
१ तदनु व्यापिन्यामनाश्रितभुवनं २ अनाथभु
वनं ३ अनन्तभुवनं ४ व्योमरूपभुवनं ५ व्या
पिभुवनं ६ शक्त्यावरणे स्थूलासूक्ष्मा अमृता
अमृतात्मेशक्तिचतुष्टयपरिवृतं परशक्तिभुव
नं ७ नादांते सद्गुह्येशपरं ब्रह्माधिष्ठितं भुवनं ८
नादावरणे ऊर्ध्वगाभुवनम् ९ रोचिकाभुवनं १०
मोचिकाभुवनं ११ दीपिकाभुवनम् १२ इन्धिका
भुवनं १३ ततो निरोधिन्यां रुन्धनी रोधनी रोधी
ज्ञानबोधा तमोपहादि निजनिजलेपपंचकप
रिवृतं निरोधिनीभुवनं १४ ततोऽर्धेन्दौ ज्योत्स्ना ज्यो
त्स्नावती कांति सुप्रभा विमला युतमर्धेन्दुभुवनं
१५ बिन्द्वावरणे निवृत्ति प्रतिष्ठा विद्या शांता परि
वृतं शांत्यतीताभुवनम् १६ एवं भुवनानि १६
ॐमिति पदम् १ मंत्रो धामत्रयमयनेत्रात्मिन्नई
शानः वर्णाः अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ
अं अः १६ कारणं सदाशिवः १ पर्यष्टकोऽशो
मनः अत्रैव स्थूलो धा बीजो नादरूकारो २

नाड्यौ कुहूशंखिन्यौ २ वायू देवदत्तधनंजयौ
२ इंद्रिये त्वक्श्रोत्रे विषयः शब्दः शब्दतन्मात्रं चगु
णः शब्दः अवस्था तुर्यातीता ३ त्रिगर्भीकृतेन रा
धानेशान्त्यतीतान्यस्य ललाटमाल्वन्तं शान्ताक
लां गर्भीकृतेन राधपंचकोष्ठाभावयितान्यहे
त् तद्यथा अस्यामंडलंकृत्वा षडश्रंषड्विंदलां
छितं ध्यानमेकास्यं वरदाभयपाणिं तस्या गर्भेत
त्त्वत्रयं सदाशिवेश्वरविद्याख्यम् ३ तेष्वन्तर्भुव
नानि सप्तदश १७ सदाशिवतत्त्वे सांगसक
लाद्यष्टकशिवरुद्रभेदावरणगतानेनरुद्रभुव
नव्यापकं सदाशिवभुवनं १ ईश्वरतत्त्वे रुद्रौंकार
ज्ञानशास्त्रान्तेभुवने कौ नष्टा महाज्ञानक्रिया
शास्त्रोर्भुवनम् २ वामाज्येष्ठारौद्रीणां भुवनमे
कम् ३ ऐश्वर्यभुवनं ४ वैराग्यभुवनं ५ ज्ञा
नभुवनं ६ धर्मभुवनं ७ अनन्तेशभुवनं ८
सूक्ष्मभुवनं ९ शिवोत्तमभुवनं १० एकनेत्रभु
वनम् ११ एकरुद्रभुवनं १२ त्रिमूर्तिभुवनं
१३ श्रीकंठभुवनं १४ शिखंडिभुवनं १५ ईश्व
रतत्त्वे ईश्वरभुवनं १६ विद्यातत्त्वे त्रिगुणी ब्रह्म
वेतालीस्थाणुमन्याम्बिकाद्रूपिणीमर्दिनीज्वा

कला
दी
५२
52

लाख्यानांभुवनम् १२ ह्रपदम् १ रपदम् २ त्त
पदम् ३ मपदम् ४ लपदम् ५ वपदम् ६ य
पदम् ७ ङपदम् ८ ह्रपदम् ९ पपदम् १०
रपदम् ११ चैवं ११ कवर्णः खवर्णः गवर्णः
चैवं ३ अस्त्रमंत्रः पुरुषमंत्रः २ रूद्रोधाचिह्नो
धीबीजौ बिन्दुयकारौ याम्योयशालम्बुसे वा
क्कर्मेन्द्रकरौ इंद्रियेत्वकाणी विषयः स्पर्शः
स्पर्शतन्मात्रंच गुणाशाब्दस्पर्शौ २ अवस्थात्
र्यापर्यष्टकांशौ तुअहंकारौ २ कारणेईश्वरः
एतद्गर्भीकृत्य शांतांतालवन्तव्याप्त्यास्थितांभाव
यित्वान्यसेत् अथविद्यायातालनोनाभ्यंतंव्या
प्तिस्तस्यामंडलेत्र्यश्रंस्वस्तिकलांछितंध्यानमे
कास्यंवरदाभयपाणिं अत्रांतरेतत्वानि ७ मा
यातत्वम् १ कालतत्वं २ कलातत्वं ३ नियति
तत्वम् ४ विद्यातत्वं ५ रागतत्वं ६ पुरुषतत्वं
७ भुवनानि २७ यथा मायातत्वोर्ध्वे विश्वेशभु
वनम् १ त्रिकालभुवनं २ हेमभुवनं ३ ब्रह्मा
धिपतिभुवनम् ४ शिवभुवनम् ५ मध्येश्वनं
तभुवनम् ६ अधोगोपतिभुवनम् ७ काल
कलातत्वयोर्महादेवभुवनम् ८ महातेजो

भुवनं ९ महाज्योतिर्भुवनम् १० नियतिविद्य
योमनोन्मनभुवनम् ११ वामभुवनम् १२ ज्येष्ठा
भुवनम् १३ रौद्रभुवनम् १४ कालभुवनम् १५
सर्वभूतदमनभुवनम् १६ कलविकरणभुव
नम् १७ बलविकरणभुवनम् १८ बलप्रमथ
नभुवनम् १९ रागकुरुषयोरनंतेशभुवनम् २०
सूक्ष्मभुवनम् २१ शिवोत्तमभुवनम् २२ एकनेत्र
भुवनम् २३ एकरुद्रभुवनम् २४ त्रिमूर्तिभुव
नम् २५ श्रीकंठभुवनम् २६ शिखंडिभुवनम्
२७ पदानि १० लपदम् मपदम् लपदम् वप
दम् यपदम् ऋपदम् रपदम् रूपदम् ओंपदम्
लपदम् मपदम् लपदम् वपदम् यपदम्
ऋपदम् लपदम् रपदम् रूपदम् ओंपदम्
मपदम् चैवं २० वर्णाः ७ चवर्णाः ङवर्णाः च
वर्णाः छवर्णाः जवर्णाः झवर्णाः ञवर्णाः एवं
७ कवचाद्योरोमंत्रौः २ अथ सूक्ष्मोधावीजोरसौ
२ नाडौइडापिंगिजिह्वापृष्ठे वायू नागव्यानौ २
इंद्रियेचक्षुष्पादौ २ विषयोरूपम् रूपतन्मात्रं
गुणाःरूपस्पर्शशब्दाः अवस्था सुषुमणा कर्थ
ष्टकोशोगन्धरूपे २ कारणंरुद्रः एवंगर्भीकृत

कला
दी
५३
53

समस्ताधाने वियो कलां भावयित्वान्यसेत् अ
घप्रतिष्ठानामेः गुल्फांतेव्याप्य स्थिता तस्या मं
डलमर्धचंद्राकृति पुंडरीकलांछितं शुक्लं ध्या
नमेकास्यं वरदाभयपाणिं तस्यामन्तस्तत्वानि
२४ प्रकृतितत्वम् १ बुद्धितत्वम् २ अहंकार
तत्वम् ३ मनस्तत्वम् ४ श्रोत्रतत्वम् ५ त्वक्त
त्वम् ६ चक्षुस्तत्वम् ७ जिह्वातत्वम् ८ घ्राण
तत्वम् ९ वाक्तत्वम् १० पाणितत्वम् ११ पादत
त्वम् १२ पायुतत्वम् १३ उपस्थतत्वम् १४ शब्द
तत्वम् १५ स्पर्शतत्वम् १६ रसतत्वम् १७ रूप
तत्वम् १८ गन्धतत्वम् १९ आकाशतत्वम् २०
वायुतत्वम् २१ तेजस्तत्वम् २२ जलतत्वम् २३
प्रकृतिस्त्रिगुणसद्भावात् २४ प्रकृतेरारभ्य श
तरुद्रांते श्रीकंठस्याधिकारः तत्र प्रकृतौ श्रीकं
ठभुवनम् १ औमभुवनम् २ कौमारभुवनम् ३
वैष्णवभुवनम् ४ ब्रह्मभुवनं ५ भैरवभुवनम्
६ कृतभुवनम् ७ अकृतभुवनं ८ योगाष्टकं
अथ बुद्धौ पितामहभुवनम् ९ प्रजेशभुवनम्
१० अमरतभुवनम् ११ विभूतिभुवनम् १२ स्वरू
पभुवनम् १३ सुभद्रभुवनम् १४ करालभुव

नम् १५ सुनन्दभुवनम् १६ देवयोन्यष्टकम्
अहंकारादारभ्य गन्धतत्त्वान्तं व्याप्य स्थितं स्था
ण्वष्टकम् तद्यथा छागलाण्डभुवनम् १७ द्वि
रण्डभुवनम् १८ माकोटभुवनम् १९ मंडले
श्वरभुवनम् २० कालिञ्जरभुवनम् २१ शंकु
कर्णभुवनम् २२ स्थलेश्वरभुवनम् २३ स्थूले
श्वरभुवनम् २४ आकाशतत्त्वे वस्त्रापदभुवनम्
२५ रुद्रकोटिभुवनम् २६ अविमुक्तभुवनम् २७
महाकालभुवनम् २८ गोकर्णभुवनम् २९
भद्रकर्णभुवनम् ३० सुवर्णभुवनम् ३१ स्था
णुभुवनम् ३२ पवित्राष्टके वायुतत्त्वे गयाभुवनम्
३३ कुरुक्षेत्रभुवनम् ३४ नाखलभुवनम् ३५
विमलभुवनम् ३६ अट्टहासभुवनम् ३७ म
हेन्द्रभुवनम् ३९ भीमभुवनम् ४० गुह्यातिगु
ह्याष्टकम् अथ तेजस्तत्त्वे हरिश्चन्द्रभुवनम् ४१
श्रीशैलभुवनम् ४२ जाल्पभुवनम् ४३ आ
म्रातकभुवनम् ४४ महाकालभुवनम् ४५
मध्यभुवनम् ४६ केदारभुवनम् ४७ भैरव
भुवनम् ४८ अतिगुह्याष्टकम् अमत्वे अमरे
शभुवनम् ४९ प्रभासभुवनम् ५० नैमिषभु

कला॰
दी॰
५४
59

वनम् ५१ उग्रकारभुवनम् ५२ आषाढिभुवनम्
५३ दिण्डिभुवनम् ५४ मुण्डिभुवनम् ५५ भा
रभूतिभुवनम् ५६ गुह्याष्टकम् पदानि २१
लपदम् वपदम् यपदम् ऊपदम् मपदम्
क्षपदम् रपदम् ह्रूंपदम् ॐपदम् लपदम् व
पदम् यपदम् ऊपदम् लपदम् ह्रूंपदम् रपद
म् क्षपदम् मपदम् ॐपदम् वपदम् यपदम्
एवं २१ वर्णाः टादिक्षान्ताः टठडढणा तथदध
न पफबभम यरलव शषसहंक्ष शिखाशिरोवामदे
वामंत्राः ३ हलपोधा बीजोऽवौ २ नाड्यौऽलम्बुषा
गान्धयौ २ वायू उदानसमानौ २ गुणाः रूपरसस्प
र्शशब्दाः विषयेन्द्रियतन्मात्राणि सर्वाणि सूक्ष्मत
त्वस्थानि कंचुकषट्कमपि सूक्ष्मतयास्थितम्
अवस्थास्वप्नः तुर्यष्टकांशोरसः कारणं विष्णुः शक्ति
समस्तासुगर्भा प्रतिष्ठांभावयित्वान्यसेत् अथनिवृ
मेर्गुल्फात्पादांतं चतुरंगुलव्याप्तिः तस्यामंडलं चतु
रस्रं वज्रलांछितं पीतं ध्यानम् वरदाभयपाणिरि
त्यादि तदन्तः शतकोटिविस्तीर्णयोजनानां पृथ्वीत
त्वमेकम् भुवनानि १०८ उपरिवीरभद्रः स्वामी १
शम्भुभुवनं २ विष्णुभुवनम् ३ गणाध्यक्षभुवनम्

४ अचलभुवनम् ५ त्रिदशेशभुवनम् ६ संवा
र्कभुवनम् ७ नमोभुवनम् ८ लिङ्गभुवनम् ९
त्रिलोचनभुवनम् १० ऊर्ध्वैकपालेशभुवनम् ११
अजभुवनम् २ अहिर्बुध्न्यभुवनम् ३ वज्रदेहभु
वनम् ४ प्रमर्दनभुवनम् ५ विभूतिभुवनम् ६
अव्ययभुवनम् ७ शास्तृभुवनम् ८ पिनाकिभु
वनम् ९ त्रिदशाधिपतिभुवनम् १० पूर्वे अग्निरुद्र
भुवनम् १ हुताशभुवनम् २ लिंगभुवनम् ३ रो
दकभुवनम् ४ हरभुवनम् ५ ज्वलनभुवनं ६
दहनभुवनम् ७ बभ्रुभुवनम् ८ भस्मान्तकभुव
नम् ९ यमान्तकभुवनम् १० आग्नेय्याम् याम्य
भुवनम् १ मृत्युभुवनम् २ हरभुवनम् ३ धातृभु
वनम् ४ विधातृभुवनम् ५ कर्तृभुवनम् ६
संयोक्तृभुवनम् ७ वियोक्तृभुवनम् ८ अधर्मप
तिभुवनम् ९ धर्मपतिभुवनम् १० याम्ये नैर्ऋ
तभुवनम् मारणभुवनम् २ हन्तृभुवनम् ३
क्रूरदृष्टिभुवनम् ४ भयानकभुवनम् ५ ऊर्ध्वके
शभुवनम् ६ विरूपाक्षभुवनम् ७ धूम्रभुवनम्
८ लोहितभुवनम् ९ दंष्ट्रिभुवनम् १० नैर्ऋते
बलभुवनम् १ अतिबलभुवनम् २ पाशहस्तभु

कला
दी॰
५५
55

वनम् ३ महाबलभुवनम् ४ श्वेतभुवनम्
५ जयरुद्रभुवनम् ६ दीर्घबाहुभुवनम् ७
जलांतकभुवनम् ८ मेघनादभुवनम् ९ स
नादभुवनम् १० प्रत्यक्षु शीघ्रभुवनम् १ ल
घुभुवनम् २ वायुवेगभुवनम् ३ सूक्ष्मभुवनम्
४ तीक्ष्णभुवनम् ५ यमांतकभुवनम् ६ पंचां
तकभुवनम् ७ पंचाशिवेभुवनम् ८ कपर्दिभु
वनम् ९ मेघवाहनभुवनम् १० वायो निधीश
भुवनम् १ रूपवद्भुवनम् २ धन्यभुवनम् ३
सौम्यदेहभुवनम् ४ जटाधरभुवनम् ५ ल
क्ष्मीधरभुवनम् ६ रत्नधरभुवनम् ७ कामिभु
वनम् ८ प्रसादकभुवनम् ९ प्रभासकभुवन
म् १० उत्तरे विद्याधिपतिभुवनम् १ सर्वज्ञ
भुवनम् २ ज्ञानतमभुवनम् ३ वेदपारगभुवन
म् ४ शर्वभुवनम् ५ सुरेश्वरभुवनम् ६ ज्ये
ष्ठभुवनम् ७ भूतपालभुवनम् ८ बलिप्रिय
भुवनम् ९ ईशानभुवनम् १० प्रशे वृषभव
नम् १ वृषधरभुवनम् २ अनन्तभुवनम् ३
क्रोधनभुवनम् ४ मारुताग्निभुवनम् ५ ग्रस
नभुवनम् ६ उडुम्बरभुवनम् ७ ईशानभुव

नम् ८ फणीन्द्रभुवनम् ९ वज्रदंष्ट्रभुवनम्
१० अथपदं ११ अथब्रह्मणोऽन्तरे रुद्रभुवनम् १
विष्णुभुवनम् २ ब्रह्मभुवनम् ३ शार्वभुवनम्
४ हाटकभुवनम् ५ कूष्माण्डभुवनम् ६ काला
ग्निभुवनम् ७ अनन्तभुवनम् ८ अत्रान्तरे चत्वा
रिंशदधिकं शतं प्रधाननरकाणामपि भाव्यम्
तच्छोधनावसरे लिख्यते इति सृष्टिक्रमेण भुव
नानि ऊपदम् यपदम् ऋपदम् रपदम् लप
दम् मपदम् लपदम् ओंपदम् यपदम् ऊप
दम् ऋपदम् यपदम् रपदम् लपदम् मप
दम् लपदम् वपदम् ओंपदम् ऊपदम् ऊपदम्
ऋपदम् रपदम् लपदम् मपदम् लपदम् व
पदम् यपदम् ओंपदम् चैवं २८ वर्णाः लपैवकः
रुद्रयसद्योजातौ मन्त्रौ स्थूलोधावीजौ वलोनाडी
पिंगला इडा च वायू प्राणापानौ इंद्रियौ घ्राणपा
द विषयो गन्धः गन्धतन्मात्रं गुणाः गन्धरसरूप
स्पर्शाः अवस्था जाग्रत् १ पृथ्व्यष्टकांशोऽस्पर्शश
ही कारणं ब्रह्मा एवं निवृत्तिकलां सर्वां ब्रह्मगर्भां
भावयित्वा विन्यस्यानन्तरं शोध्याशोधयितृशोध
कवक्त्राङ्गकलादिन्यासं कुर्यात्सर्वं वाञ्छितं तं

कला
दी·
५८
58

कुर्यात् ततः सासनं सपरिवारं शिवं शिष्यात्मा
नं मानसयागवन्मनसार्चयेत् ततो गुरुः स्वा
त्मीयकरयोः शिवहस्तं विधाय शिवहस्तं गुरुः
शिष्यस्य शिरसि हृदये च दद्यात् पुनरेवमेव शि
ष्यहस्तयोः शिवं संपूज्य प्राग्वच्छिवहस्तस्व
जनमंत्रसंक्रान्तीर्विधाय शिवहस्तं शिष्यशिर
सि हृदये च दत्वा शिवहस्तार्पितमंत्रं शतशो ज
पेत् उक्तं च उक्तशेषश्च कः उक्तौ शिवहस्तस्य
मूर्धनि यस्य सद्गुरुणा दत्तस्तस्य दीक्षां गम्भरणो
क्षितवस्त्रबद्धसर्षपरक्षणादिकं कंकणं निःश्वासमं
हितौ कुर्यात् त्रयेन शिष्यदक्षिणपाणौ बद्ध्वा तथै
व तद्वस्यान्तं स्वकरे गुरुरपि बन्धयेत् तदार्यात्रयं
यथा ॐ पापहरस्ते भगवाञ्छिवोस्तु मंद्भरत्र सर्व
भूतगणाः शान्त्यै भवन्तु यत्ताहृदयं नारायणः पा
तु प्राणापानौ च चक्षुः श्रोत्रे घ्राणे मनः शिरो हस्तौ
प्रकृतावपि यद्दुपात्तेन तं देवः शिवः पातु बध्नामि
कंकणं तेवद्ध मतिर्भवभवाच्छित्यै भजनिपुणम
चलमलिनमभवायाव्ययं स्थानमभवायेहशा
श्वतं स्थानम् ततः प्राग्वत्कवदधानं कलशस्थंडि
लपावकशिष्यं षेकेन भावनयातु सन्त्येयम्

कलशो यज्ञरक्षकः स्थंडिले धर्मसाक्षी अग्नौ
कर्मधारः शिष्ये पाशमोचकः शरावगुरुशक्ती
तेऽभिपंचाधिकारणो विभक्षिंत्यः ततोऽग्रकर्मू
ले सवक्रां गंजपाशिष्य कलश स्थंडिलादौ भ्रजां
कारयेदिति श्रीस्वच्छन्दोक्तिः निमग्नत्तानाक्रि
यारूपं करणमस्त्रमन्त्रजनये वाकर्षणेनावष्ट
भ्य वक्त्रान्तिकं नयेत् वक्त्रोग्रकंरौ चग्रष्ठांज
लिंदापयेत् कुंडसमीपे स्वदक्षिणे मंडलके
प्रणवासनयुक्ते निवेश्य भैरवमंत्रितं दर्भमूलं
सार्धहस्तत्रयपरिमाणं वामावर्तेन वेष्टयित्वा
तं दर्भनाडीं वा तस्य हृत्पद्ममध्ये दत्वा तदग्रं
स्वकजानुमध्ये जंघोपजंघा वष्टभ्य कृत्वा त
मेव दर्भमूलं नाडीं वा स्वकजंघोपजंघयोर्दत्वा
मध्यनाडीसङ्गमार्गां शिष्यदेहान्निर्गच्छंतीं ग्र
करात्मनाडीं लीनां भावयेत् दर्भाग्रे दक्षिणे
नस्यानिधाय करपल्लवे तन्मूलमात्मजंघायां
मध्ये वेतिमतां तरम् इति सोमशंभुः ॐ हूं ग्र
शकस्य मध्यनाडी मम मध्यनाड्यां लीना भवतु
स्वाहा आहुतीः ३ ॐ हूं ग्रशकस्य मध्यनाडी
मम मध्यग्राह्यां लीना समयत्वग्रस्त स्वाहा आ ३

कला
दी
५०
57

तत्रप्रवेशप्रनिर्गमत्यागग्रहणोत्कर्षणोद्देनवे
नाडीसन्धानम् ततः संपातमाहुतित्रयेणसं
हितयास्वेत्य ओं ह्रैं तिशिखाशिरसि कार्यम्
यथा ओं ह्रां सम्पातं करोमि स्वाहा श्रा ३ ओं ह्रीं
सम्पातं करोमि स्वाहा श्रा ३ ओं ह्रूं सम्पातंक
रोमि स्वाहा श्रा ३ ओं ह्रैं सम्पातं करोमि स्वाहा
श्रा ३ ओं ह्रौं सम्पातं करोमि स्वाहा श्रा ३ ओं ह्रः
सम्पातं करोमि स्वाहा श्रा ३ ओं ह्रूं सम्पातंक
रोमि स्वाहा श्रा ३ इति मूलेनाज्याहुतिं परमा
मृतत्र्वपां शिखाशिरसि क्षिपेत् अनंतरं मूल
स्य शतं पञ्चदादीनां दशांशं हुत्वा ओं ह्रूं देशास
म्पत्तिः संपद्यतां स्वाहा श्रा १०८ ओं ह्रूं कालसं
पत्तिः संपद्यतां स्वाहा श्रा १०८ ओं ह्रूं दुर्निमित्ता
पसर्पणं संपद्यतां स्वाहा श्रा १०८ ओं ह्रूं सर्वनिमि
त्तसम्पत्तिरस्तु स्वाहा श्रा १०८ एवं निष्कलस्थाने
दृष्ट्यादयः ततः शर्णादत्वामेत्राणोदीपनं कुर्या
त् तद्यथा ओं ह्रीं ह्रूं ह्रूं फट् स्वाहा ओं ह्रीं ह्रैं ह्रूं फ
ट् स्वाहा ओं ह्रूं ह्रः ह्रूं फट् स्वाहा ओं ह्रूं लं ह्रूं फट्
स्वाहा ओं ह्रूं यं ह्रूं फट् स्वाहा ओं ह्रूं रं ह्रूं फट् स्वाहा
ओं ह्रूं वं ह्रूं फट् स्वाहा ओं ह्रूं लं ह्रूं फट् स्वाहा प्रत्येकं

श्रा १ पाशानांबंधनार्थमन्त्राङ्कुरान्प्रकुटी
करालांश्चिंतयेत् अथसत्कन्यकाकन्तितं
शिष्यदेहप्रमाणेनसूत्रत्रयपरस्परलोलीभा
वतयावापाशत्रयतयावासत्वादिगुणत्रय
मयतयावानवतन्तुकंपाशसूत्रंप्रोक्षितं
हुंफट् शिवाम्भसासंप्रोक्ष्य ॐह्रैंअवगुंठ
यामिनमः इत्यवगुंठितंपूपितंवक्षोनापि
नमस्तेशातजमम् ॐपाशबंधनसूत्रायन
मः गन्धंवर्जेगुह्यः पूजितम् ऋजूस्थितस्यं
सः सव्यपादाग्रात् स्त्रियोवामात्छिरोन्तम्
रोमुक्तयेविपर्ययाच्छिरोन्तः पादांतंनाम
वेशात्रसत्यानेनप्रसार्यनिमित्राशिवोया
मेवबध्नीयात् ॐहूंप्रविशामिनमः इतिवा
मनाडयाशिष्यहृदयंप्रविश्य ततोमध्यना
डीविश्लेष्यसंहारमुद्रयादायदक्षिणप्रवा
हेणनिरीय ॐह्रांअस्त्रकाणसुषुम्णानाडीं
ह्रांपाशसूत्रेयोजयामिनमः इतिसूत्रेनियो
ज्य ॐअनेकनाडीकोटिपरिहृतायैसुषुम्णा
नाड्यैनमः इतिपूजापाशसूत्रे ॐअनेकना
डीकोटिपरिहृतायैसुषुम्णानाड्यैस्वाहा

कि
त्रि
११
१२

२ कला
दी
५८
58

श्री ३ अनेकनाडीकोटिपरिवृत्तायाः सप्तमाग
नाड्याः सन्निधानमस्तु स्वाहा श्री ३ अथातः
क्रियात्मिकां शक्तिमाधारतया विन्यस्य ॐ ष
डध्वगर्भीकारिण्याधारशक्ते आगच्छागच्छ
एवं संतिष्ठ संतिष्ठ सन्निधत्स्व २ सन्निरुद्धा भव
२ सन्निहिता भव २ ॐ षडध्वगर्भीकारिण्यै
आधारशक्त्यै स्वाहा श्री ३ अथानु पाशसू
त्रे शरीरस्वरूपामये षडध्वकं सृजयेत् ॐ क
लाध्वने नमः ॐ तत्त्वाध्वने नमः ॐ भुवनाध्व
ने नमः ॐ कलाध्वने नमः ॐ पादाध्वने नमः
ॐ मन्त्राध्वने नमः प्राग्वत्सूत्रे ध्याने विन्यसेद्य
था पाशसूत्रेकरं आललाटान्ताशिवतत्त्वस्य
भुवनषोडशकधामत्रयमयनेत्रभिन्नायै
मन्त्रपदैकव्यापिकायै शान्त्यतीतायै नमः
ॐ ततो ललाटान्नासान्तं तत्त्वत्रयसमष्ट
श भुवनवलत्रयमन्त्रहृदयपदैकादशक
बीजहृदयनाडिद्वयवायुद्वयकरणद्वयस्प
र्शनमात्रस्पर्शविषयगुणद्वयतुर्यावस्था
व्यापिकायै शान्ताकलायै नमः ततस्तालु
न्तान्नाभ्यन्तम् तत्त्वसप्तकस्य भुवनसंख

विंशतिवर्णात्मकमन्त्रहृदयपदविंशतिबीज
हृदयनाडिहृदयकरणहृदयरूपतन्मात्ररूपाविष
यगुणत्रयसप्तमावस्थाव्यापिकायै विद्याक
लायै नमः ततो नाभेर्गलस्कान्तम् चतुर्विंश
तितत्त्वषट्पंचाशद्भुवनवर्णत्रयोविंशति
मंत्रत्रयेकविंशतिपदवीजहृदयनाडिहृदयवा
ग्हृदयसप्तविषयेन्द्रियतन्मात्रस्थूलकंचुकष
ड्गुणचतुष्टयसप्तमावस्थाव्यापिकायै प्रतिष्ठा
यै नमः ततो गलस्कान्मादांगुष्ठान्तं षष्टीतत्त्वा
ष्टोत्तरशतभुवनान्तवर्णमंत्रहृदयपदाष्टाविंश
तिवीजनाडिप्राणेन्द्रियविषयहृदयगुणपंच
कजाग्रदवस्थाव्यापिकायै निवृत्त्यै नमः इति
शिष्यदेहवच्छिन्नपाशसूत्रे न्यासं कृत्वा ततः
शिष्यस्य प्रोक्षणसन्ताडने विधाय ब्रह्मरंध्राम
नाड्या रेचकेन हृदि प्रविश्य ॐ हूं प्रविशामि
नमः इति प्रवेशनमंत्रः ॐ हः ह्रौं अमुकात्मा
नं देहाद्वियोजयामि हूं फट् तारकाकारं शि
ष्यात्मानं रश्मिवियोगेनासिना छेदयाच्छित्वा
ॐ हूं हौं अमुकात्मानमाकर्षयामि नमः अं
कुशरूपेण निष्कलमंत्रेणाकृष्य शिष्यमोग

द्वादशांतं प्रापय्य ततः संहारमुद्रयादाय
आत्मानं तत्करे कृत्वाङ्गुष्ठतलमध्यगम् स्वात्म
नः संमुखं नीत्वा किंचित्संकुचितांगुलिम् सं
हारेति समाख्याता मुद्रा संहारकर्मणि ॐ हूं
हां हः हौं अमुकात्मानं पाशसूत्रे योजयामि न
मः इति सूत्रे संयोज्य ॐ हूं अमुकात्मानः पा
शसूत्रे सन्निधिरस्तु स्वाहा श्रा २ ततस्तद्देहग
तपाशत्रयं कारणकार्यव्यापकव्याप्यभावेन
स्थितं सूत्रे भावयेत् तत्र लौकिकात्मा संकोचप्र
वर्तको नियतः सर्वगतश्चाणवो मलः कारणं
एवं मायीयकार्मयोः परस्परं कार्यकारणता न
त्वादिसर्गे कर्म नास्ति आणवसहचरितो मा
यीयोऽस्ति अतः कार्मस्य कारणतां याति तदनु
कार्ममलस्याणवसहचरितो मायीयतनुप्रा
दौ कारणमेवेति पाशानां कार्यकारणता प्रथ
मं व्यापकत्वं कलानां व्याप्यत्वं तत्त्वानां व्यापकता
तत्त्वानां व्याप्यत्वं भुवनानां कलानां तत्त्वभुवनानि वा
च्यानि मंत्रवर्णपदानि वाचकानि इति द्विधा वाच्य
वाचकरूपं जगत् वर्णाः कलाश्च परमाः सूक्ष्मा
स्तत्त्वमंत्राः स्थूलानि पदभुवनानि इत्यपरो भेदः

अथवा वर्णो व्यापकाः मंत्रा व्याप्या मंत्र व्याप
काः पदानि व्याप्यानि कला व्यापकाः तत्त्वानि
व्याप्यानि तत्त्वानि व्यापकानि भुवनानि व्याप्या
नि अथवा वाचको धा वर्णादि व्यापकः वाच्यः
कलादि व्याप्यः इति शोध्य पाशत्रयं सूत्रगमपरं
शरीरमिव च्छेददाहादियोग्यं भवति न तद्देह
स्यामिति पाशत्रय कल्पनात्र सबीजतायां प्रारब्ध
देहसमय पाशं विना त्रैकालिक कर्म सर्वमंतर्भा
मिनमः ॐ ह्रूं ह्रः अमुकाणोः शान्त्यतीताक
लायांकारणेसदाशिवमुपस्थापयामिनमः

कला
दी
११८
118

आर्विन्दुन्नाद्वलसंधांतमेषाव्याप्तिर्यस्यास्त
त्वमेकंपदंवा एकोमंत्रःषोडशैवंतत्त्वपर्यास्ता
तन्मात्रोवर्णराशिस्तथात्र सात्वंस्थानादेत्य
देविस्वकीयादाकार्यात्तत्संनिधानेभजस्व
सादाशाम्बापाशसूत्रेशिशोस्त्वांसर्वार्थैस्त्वां
शांत्यतीतांनमामि ॐ ह्रूं हः शांत्यतीताक
लांशिवतत्वव्याप्तशांत्यतीतादिसदाशिवांत
भुवनषोडशकवर्णषोडशकनेत्राभिन्नईशा
नमन्त्रपदैकव्यापिकेआगच्छागच्छेत्यादि
पूर्वंव्यापिकायैनमः इतिसम्पूज्य व्यापिका
याः संनिधानमस्त्वस्याः आ ३ मंत्रैःपदार्णै
र्भुवनैस्तत्वैर्व्याप्तवपुर्भृते स्त्रीनामानामरूप
येशांत्यतीतायैनमोनमः इतिसंश्रावयेत्
तत्रपाशत्रयेकरन्यस्तसूत्रेशोध्यत्वेनचिंतयेत्
ततःकुंडेआधारशक्तिमावाह्यादिनाविन्यस्य
पाद्यादिदत्वा ॐ ह्रूं षडध्वगर्भकारिण्यैआधा
रशक्त्यैनमः इतिसम्पूज्यस्वाहान्तेनसंतर्प्य
ॐ ह्रः शांत्यतीताकलापाशायहूंफडितिशि
ष्यकरन्यस्तपाशमानाऽम्रसूत्राद्वियोज्य ॐ ह्रः
शांत्यतीताकलापाशायहूंनमइत्यंकुशास्त्र

इयाप्पूरकेनाकृष्य ॐ हः शांत्यतीताकला
पाशाय हुं फट् इति संहारमुद्रयाकुम्भकेनब्र
ह्मरंध्रादादायतोचगर्भेकृतेनराघ्रपंचको
ॐ हूं हः शांत्यतीताकलांकुंडेकल्पयामि नमः
इत्युद्भवमुद्रयारेचकेनकुंडस्थांकृत्वा संपूज्य
ॐ हूं हः शांत्यतीतायाः सन्निधानमस्तु स्वाहा
श्रा ३ तस्यामतः समनोकान्विशुद्धानतिह
स्तान्याशान्भावयेत् ॐ भगवन्सदाशिवाग
च्छागच्छेत्यावाहनादिपूर्वं पाद्यादिदत्वा शां
त्यतीताधिपतये सदाशिवाय नमः इति संपू
ज्य स्वाहान्तेन संतर्प्य तवाधिकारे सादाख्ये शु
शुद्धं दीक्षयाम्यहम् भाव्यंत्वयात्रकृत्स्नेनप्र
योनाधिकं विधिम् इति विज्ञाप्य महामाया
रूपां समनां वागीशीमावाहयेत् ॐ हूं शां
त्यतीतागतनाशिवतत्वस्थशांत्यतीतादिशि
वान्तषोडशभुवनान्तर्गतसमनोत्पाति स्थूल
शरीरहेतो वागीश्वरि आगच्छेत्यादिना विध्याह्वे
तः पाद्यादिपूर्वं वागीश्वर्यै नमः इति संपूज्य
वागीश्वर्याः सन्निधानमस्तु स्वाहा श्रा ३ श्र
ध्यात्मनईश्वरभावमवलम्ब्याशिष्यमासीना

कला
दी
११९
119

शिवाम्भसा सम्प्रोक्ष्य संताड्यात्मदेहेणानिरी
यशिष्यपाशमध्यभागे वामनाड्या ॐ हूं प्रवि
शामि नमः इति प्रविश्य ॐ ह्रां ह्रीं ह्रौं स्वप्नत्वे
पुटितं तारकरूपं संचिन्त्य ॐ ह्रां ह्रीं ह्रौं हः फ
डिति जीवं शाशाग्राग्रशिखमात्राद्वियोगेन हृदाच्छि
त्वा ॐ ह्रीं हूं ह्रौं आत्मने हूं ह्रां हूं ॐमिति भुवस
म्पुटितसंज्ञारूपहृदया पूरकेन स्वहृदयमानीय
ॐ हूं ह्रौं इति संकुम्भ्य ब्रह्मादिकारणत्यागेन रे
चकेन नीत्वा ततः संस्पृष्टात्मानमीश्वरमाया
वागीशीबीजरूपं च तेनैव तत्वमिति ध्यात्वा वामा
शक्त्या लिंगमुद्रया तद्गर्भे नियोजयेत् अथ संयो
जनमंत्रः ॐ हूं ह्रां ह्रौं वागीशीगर्भे शान्त्यतीता
गतशिवतत्त्वस्थशान्त्यतीतादिशिवान्तनाना
भुवनान्तर्गतसमस्तातिसूक्ष्मशरीरसमस्तेषु
युगपदङ्केचैनं संयोजयामि नमः इति संयो
ज्य योजयामि स्वाहेति आ ३ ॐ हूं वागीशीग
र्भे शान्त्यतीतायामशिवतत्त्वस्थशान्त्यतीता
दिशिवान्तनानाभुवनान्तर्गतसमस्तान्याति
सूक्ष्मविचित्रशरीरेषु युगपदङ्कायोगगर्भे
निष्पत्तिं करोमि स्वाहा आ ३ एवं जन्मनिष्प

त्तिं देहानां युगपद्दाहभावनम् एवं कर्मा
र्जननिष्कृतिं भोगनिष्कृतिम् प्रागार्जितम्
शैवविज्ञानभावे कर्मयुगपत्याकोन्मुखे भा
वयित्वा प्रारब्धभोगनिष्कृतिं एवं लयनिष्कृ
तिं शान्त्यतीतायामपि निर्वृत्तिकलावन्निष्कृ
तिः ओं ह्रूं वागीशीगर्भे शान्त्यतीताख्यां शिव
तत्त्वस्थ शान्त्यतीतादिशिवान्त नानाभुवनान्त
र्गत समनोन्याद्यतिरिक्तविचित्रशरीरे युगपद्
मुकाणोर्निष्कृतिं करोमि स्वाहा आ १८ ओं
अमुकायाः शान्त्यतीतायां विश्लेषं करोमि स्वाहा
आ २ एवं पाशच्छेदं करोमि स्वाहा आ २ ओं ह्रूं
अमुकस्य तन्नैकस्मिन्भुवने षोडशकोटिसहस्र
नानाविधशरीरच्छेदं करोमि स्वाहा आ २
ओं ह्रूं अमुकाणोर्भविष्यत्कर्मशोधयामि स्वाहा
आ २ ओं ह्रूं भूतकर्मप्रारब्धशरीरकर्मवर्ज
वर्तमानकर्मभविष्यत्कर्मत्रयशुद्धिरस्तु स्वाहा
आ २ ओं ह्रूं अमुकाणोर्मायापाशं शोधया
मि स्वाहा आ २ ओं ह्रूं अमुकाणोः कार्मपा
शं शोधयामि स्वाहा आ २ ओं ह्रूं अमुकाणो
राणवपाशं शोधयामि स्वाहा आ २ ओं ह्रूं

कला
टी
१२०
120

अस्त्रकाणोर्मायाकार्माणवपाशत्रयशुद्धिर
स्तुस्वाहा श्रा ३ ॐ ह्रूंहः अस्त्रकाणोः शांत्य
तीतकलांशोधयामिस्वाहा श्रा ३ ॐ ह्रूं अ
स्त्रकाणोराणवमलंशोधयामिस्वाहा श्रा ३
ॐ ह्रूं अस्त्रकाणोः कार्ममलंशोधयामिस्वाहा
श्रा ३ ॐ ह्रूं अस्त्रकाणोर्मायीयमलंशोधया
मिस्वाहा श्रा ३ ॐ ह्रूं अस्त्रकाणोर्मायाकार्मा
णवमलत्रयशुद्धिरस्तुस्वाहा श्रा ३ ॐ ह्रूं अस्त्र
काणो बीजकत्वभूतंकर्मशोधयामिस्वाहा श्रा
३ ॐ ह्रूं अस्त्रकाणोर्निर्बीजगुरुकत्वंपतत्स्वार
अशरीरवर्जवर्तमानकर्मशोधयामिस्वाहा
श्रा ३ ॐ ह्रूं अस्त्रकाणोर्निर्बीजगुरुकत्वेस
मयपाशसहितंभविष्यत्कर्मशोधयामिस्वा
हा श्रा ३ ॐ ह्रूं अस्त्रकाणोः सबीजगुरुकत्वे
समयपाशरहितंभविष्यत्कर्मशोधयामि
स्वाहा श्रा ३ ॐ ह्रूं अस्त्रकाणोर्लौकिकधर्मसा
धकत्वेकर्मत्रयशुभफलरहितंशोधयामि
स्वाहा श्रा ३ ॐ ह्रूं अस्त्रकाणोः शिवधर्मि
साधकत्वेमंत्राराधनफलवर्जितंभविष्य
त्कर्मशोधयामिस्वाहा श्रा ३ ॐ ह्रूं अस्त्र

कारणैः सद्योनिर्वाणयां कर्मत्रयं शोध
यामि स्वाहा श्री ३ पुत्रकेप्येवमेव सहस्रा
साधकेप्येवमेव समभ्यावेचयेत् ततः संक्षेपे
सति ॐ हूं ह्रः अस्त्रकारणैः कलाध्वानं शोधया
मि स्वाहा श्री ३ ॐ हूं ह्रः अस्त्रकारणैः शान्त्यती
ताकलां शोधयामि स्वाहा श्री ३ ॐ हूं ह्रः अ
स्त्रकारणैस्तत्त्वाध्वानम् श्री ३ भुवनाध्वानं व
र्णाध्वानम् मन्त्राध्वानम् पदाध्वानम् विल
ये सति सर्वस्रुपस्यानवच्छेदोऽप्यम नेत्रेणनाडि
शुद्धिः अस्त्रेणावस्थाशुद्धिः प्राग्वद्विचार्य ॐ
हूं ह्रः शान्त्यतीताकलाशिवतत्त्वस्य शान्त्यतीता
ख्यशिवान्तनानाभुवनषोडशकवर्णषोडशक
नेत्राभिन्नईशानमन्त्रपदैकेन्द्रियहृदयबीजह
यनाडिहृदयवायुहृदयशब्दतन्मात्रशब्दविषय
शब्दगुणान्वयातीतावस्थाशुद्धिरस्तु स्वाहा श्री
३ ॐ हूं ह्रः शान्त्यतीताकलापाशाय हूं फ
ट् इति समास्त्रजप्तया कर्तर्या सूत्रात् शान्त्यती
ताकलापाशं छित्त्वा हस्ताभ्यां विमृश्य वर्तुली
कृत्य ॐ हूं ह्रः शान्त्यतीताकलापाशाय हूं
फडिति हृद्गयं कृत्वा ॐ ह्रः शान्त्यतीताकला

पाशमस्त्रकाणोः स्फुड्येन ह्रौं मिह्रुं फट् स्वाहा
वौषट् अथवा ह्रूं हः शान्त्यतीताकलापाशं त
तैकभुवनषोडशवर्णषोडशकमन्त्रैकपदै
कसहितमस्त्रकाणोः स्फुड्येन ह्रौं मिह्रुं फट्
स्वाहा वौषट् इति हुत्वा ॐ ह्रूं न्मनाधिकान्य
थाकृतकर्मप्रायश्चित्तनिर्हृतिविधिशरणेचा
स्वावौषट् इति पूर्णां दत्वा तच्चैतन्यमेकचेत
न्यभावनया कलाग्रं स्फुरद्रूपं सघोषाद्वि
शमेनचन्द्रबिम्बेनसन्निभं ध्यात्वा ॐ ह्रूं ह्रां अस्त्र
काणोः शान्त्यतीताकलापाशमुद्धरामि स्वाहा
श्रा ३ अथवा ॐ ह्रूं ह्रां शान्त्यतीताकलान्तर्वे
कस्माद्भुवनषोडशकान्मन्त्रैकस्मात्पदैकस्मा
दस्त्रकात्मानमुद्धरामि स्वाहा श्रा ३ तच्चैतस्मा
दग्नेरैशाद्यादायशरकेन तत्स्थं कृत्वा ॐ ह्रूं ह्रा
मिति संरुध्य स्वहृदं शान्तं रेचकेन नीत्वा भव
समुटितं ॐ ह्रूं ह्रां ह्रूं अस्त्रकात्मने ह्रूं ह्रां ह्रूं ॐ
इति गृहीत्वा तच्छिष्यहृद्दशान्तक्रमेण तत्स्थ
कृत्वा ॐ ह्रूं ह्रां शोधितमस्त्रकात्मानं तत्स्थं क
रोमि स्वाहा श्रा ३ ततः शिष्यशिरसि विध्य
र्घपात्रतः समयाम्लेनाभिनुमम्ननोपममा

प्यायनायदद्यात् ततः सदाशिवमावाह्य
सम्पूज्य सन्तर्प्य स्वाहेत्या ३ सदाशिवाष्टकाणस
र्वं मनोर्पयामि स्वाहा श्रा ३ ॐ सदाशिवव
यानास्य साधकस्याशिवाज्ञया प्रतिबन्धः प्र
कर्तव्यो यातः पदमनामयम् तथाचान्ये ॐ
सदाशिवरुद्राणां तेमनः स्वल्कं शिशोत्त्वया
शिवाज्ञया निरोधो न कार्यो यातः परं पदम्
इति संश्राव्य संपूज्य विशेषेण विसर्जयेत
मामकीनां रुद्राणां चैस्वाधिकारे सदाशिव
ससाधकायमेतन्नोदेयमभीष्टं वरं मम भगव
न्देवदेवेश शरणागतवत्सले भक्तस्य मम
दीनस्य त्वं मम सान्निध्यं कुरु त्वमखमन्त्रनाथ
त्वं रुद्राणां त्वत्कृतं बलिम् यथाशक्तियथा
द्रव्यं यथाविभवविस्तरम् दत्ताक्रियामंत्रही
नं ध्यानहीनं च यत्कृतम् तत्सर्वं पूरयित्वाश्च
गच्छदेवस्वकं पदम् वागीशीमपि सम्पूज्य
ॐ ह्रां वागीश्वर्यै नमः ॐ ह्रां वागीश्वर्यै स्वाहा
श्रा १०८ अथवा ५४ वा २७ वा १४ इति सं
तर्प्य विशेषेण विसर्जयेत् तद्यथा ॐ स्थूले
सूक्ष्मे मध्ये परांपरतं रूपे विभोर्यास्थिते क्रतं

कला
टी
१२२
122

पंचविधंकरोतिभगवान्विश्वस्ययल्लीलया
याशक्तिःसमवायिनीपराशिवेवागीश्वरीत्यु
च्यते तत्सर्वंवरदेशिवेविलसितंतस्यास्तुवै
वाङ्मतम् मातस्तत्रगोणभुवंकिलचतुर्विंशा
धिकेद्वेशते तत्रप्राणमयीततोध्वनिमयीत
त्राद्यवर्णात्मिका पश्चान्मन्त्रमयीतथापदमयी
यापंचधाकीर्त्यतेसैवंपंचकलामयीविजय
तेवागीश्वरीसर्वदा आद्यापंचकलापराग
तिनिभाकन्योत्थिताकुण्डलिका सौम्येयाकि
लकालिकाभगवतीश्रीकालसंकर्षिणी या
स्याग्राग्र्यमालिनीविजयदायानादिफान्ताक्ष
रा नास्माश्र्धपदस्थितापिण्डनिभिर्वागीश्वरी
गीयसे आदिक्षान्तमहार्णिशंतनुनदतीयाश
ष्दाशिस्थिता पश्यंतीत्वथमध्यमावलप
रातस्याःपरावैखरी सर्वप्राणिष्ठयाखिलार्थ
जननीत्वेकाचतुर्धास्थिता सातस्मात्वमचिं
त्यरूपमहिमावागीश्वरीप्रोच्यसे मार्गेशैवम
गम्यमस्वगाहनंयोगेश्वरैरप्यहो तत्राचार्य
पदस्थितोप्यहमयीलेशात्मसादस्यते इत्थं
प्राकृतकेविभ्रोश्मणवान्यूनाधिकंयत्कृतं

नत्वंशरण्यदेविदेहिशरणंयातायमातःपदम्
तमस्त्वदेवदेवेशिपश्चार्थ्यवेदितामया इदा
नीनोपरोद्धव्यंगच्छदेविस्वविष्टपम् सृष्टि
स्थितिलयेदक्षेभोगमोक्षप्रदेशिवे वागी
श्वरीनमस्तेस्तुगच्छदेविस्वविष्टपम् इतिवा
गीश्वरींविसृजेत् मानसेपाशजालंविशुद्धं
विभाव्य शांत्यतीतांपरमशिवतत्त्वेविली
नांभावयेत् ॐ हूं हः शांत्यतीताकलाहूंप
रमशिवतत्त्वेनिलीनास्तुस्वाहा श्रा १ इति
फट्सदीर्घोच्चारेणततोमूलेनशतंद्वावाष्टशतं
दत्वादिग्बलिभूततर्पणादिकुर्यात् इतिशां
त्यतीताकलाशुद्धिःसमाप्ता ॥ ॐ हूं अमुका
णोरात्मतत्त्वाममायान्ताध्वशुद्धौकायक
विधिवैकल्यदोषशुद्धिरस्तुस्वाहा श्रा १८
इतिशतंशाहोमवारंदद्यात् ॐ हूं अमुकाणो
र्विद्यातत्त्वामसदाशिवान्ताध्वशुद्धौवाचिक
मन्त्रोच्चारविलोमशुद्धिरस्तुस्वाहा श्रा १८
इत्यर्पणंस्मृता ॐ हूं अमुकाणोःशिवतत्त्वा
माशिवान्ताध्वशुद्धौमानसविज्ञानमनोवैक
ल्यदोषशुद्धिरस्तुस्वाहा इतिमनसा श्रा १८

ततश्चध्यात्वास्यामकलेकांपरांशांतामनौपम्या
मनामयींसर्वतत्त्वव्यापिनींषट्कारणाश्रितां
शांत्यतीतांशिशोःशिखोर्ध्वेशाख्याग्रजलबिं
दुवत्ध्यात्वानिष्कलांशिखांमंत्रितयाकर्तर्या ॐ
ह्रःह्रूंशिखायैहूःह्रूंफडितिचतुरंगुलांशिखां
छिन्द्यात् तांचगोमयगुलिकामध्यगताम
स्रुक्स्रुवेदापयित्वाशिष्यंकेशनिर्वपनंस्नानं
चकारयित्वा स्वयंचनिर्गत्यावगाहमाचमनं
चविधाय पुनःकुंडसमीपेउपविश्यस्वात्मन
सकलीकृत्य ॐह्रूंशिखायैहूःह्रूंफडितिअ
थवा ॐह्रूंहूःह्रूंफट् अस्त्रकारणैःषडध्वसहि
तांशिखांपाशंजुहोमिवौषट् इतिशिखांपूर्ण
यासमंहुत्वास्रुक्स्रुवकर्तरीःप्रक्षाल्याचम्य
ततोगुरुःकलशसमीपंगत्वोपविश्यस्वात्म
निवक्त्रांगन्यासंकृत्वा कलशेभगवन्तमभ्य
र्च्य कलशगतंदेवंसंतुष्टंध्यात्वाप्रणम्ययाग
स्थानंशिष्येणसहप्रविशेत् तत्रोपविश्य
पुनःसकलीकृत्य शिवहस्तंविधायमंडले
भगवंतंसमभ्यर्च्यविज्ञप्तिंकुर्यात् भगवंस्त्वत्प्र
सादेनषडध्वान्तव्यवस्थितम् शिष्यंसंहृत्य

संशोध्य शिखोच्छेदावसानकम् तन्तुबो
कविधानं तल्लेशतो वर्णितं मया तच्छस्त्राने
नेगलव्यमाप्सुध्रुवपदं शिवम् इदानीं योज
नीकर्म नवाज्ञातविधायिनः श्रात्तोमेदीय
तो नाथ शिष्यं संयोजयाम्यहम् इतिकृतवि
ज्ञप्तिः भावनया लब्धाज्ञः शिष्यस्य सक
लीकरणं कृत्वा शिवहस्तं च विधाय मंडलेषु
ष्यंजलिं दापयित्वा दंडप्रणतिं च कारयित्वा
शिष्येण सह निर्गत्य प्रकुण्डोर्ध्वं हस्तोऽग्निसमी
पे शिष्यस्य करे दत्वा प्राग्वन्नाडीसन्धानं कृत्वा
यथाशक्ति मंत्रतर्पणं मन्त्रं जयामृतेश्वरीति
कलसांगाघोरसांगवक्त्राघोरेश्वरीसांगास
न्तर्पयेत् मूलेन पूर्णां दत्वा शोधितोऽध्वांगमं
त्रैर्यस्तेयानायातयामताम् यात्रापि शुद्धाः
संस्कारास्तेषां कार्याः पृथक्रथक्तकलीकृ
तेदेहत्वम् येष्वन्यस्तेषु पूर्च्छिशोः वक्त्रांगमं
त्रोस्तानेव पूर्णाभिन्नकलाक्रमः शिशावस्मि
न्नयोज्य इति संश्राव्य तर्पयेत् ॐ हूं हः फट्
अस्त्रं शोधयामि स्वाहा ग्ना १ ॐ हूं हैं वौषट्
नेत्राणि शोधयामि स्वाहा १ ॐ हूं हैं हुं कवचं

कला
दी
१२५
125

शोधयामिस्वाहा अ। १ ॐ ह्रूं ह्रूं वषट् शि
खां शोधयामिस्वाहा अ। १ ॐ ह्रूं ह्रीं स्वाहा शि
रः शोधयामिस्वाहा अ। १ ॐ ह्रूं ह्रौं नमः हृदयं
शोधयामिस्वाहा अ। १ ॐ ह्रूं हं ईशानमन्त्रं
शोधयामिस्वाहा अ। १ ॐ ह्रूं यं तत्पुरुषमन्त्रं
शोधयामिस्वाहा अ। १ ॐ ह्रूं रं अघोरमन्त्रं शोध
यामिस्वाहा अ। १ ॐ ह्रूं वं वामदेवमन्त्रं शोध
यामिस्वाहा अ। १ ॐ ह्रूं लं सद्योजातमन्त्रं शोध
यामिस्वाहा अ। १ एवं मन्त्रैकादशकं शोधयि
त्वा ॐ ह्रूं ह्रूं निष्कलमन्त्रं शोधयामिनमः इति
मूलेशतजापेन शोधयित्वा पुनः ॐ ह्रूं हं भग
वन्नीशानात्मकाणो निष्कलधामप्रध्यापरोभव
स्वाहा अ। १ ॐ ह्रूं यं भगवं तत्पुरुषात्मकाणो
निष्कलधामप्रध्यापरोभवस्वाहा अ। १ ॐ ह्रूं
रं भगवन्नघोरात्मकाणो निष्कलधामप्रध्याप
रोभवस्वाहा अ। १ ॐ ह्रूं भगवन्वामदेवमात्म
काणो निष्कलधामप्रध्यापरोभवस्वाहा अ। १
ॐ ह्रूं लं भगवन्सद्योजातात्मकाणो निष्कलधा
मप्रध्यापरोभवस्वाहा अ। १ ॐ ह्रूं हः फट् भो
अस्त्रात्मकाणो निष्कलधामप्रध्यापरोभवस्वा

हा स्वा १ ॐ ह्रूं ह्रौं वौषट् भोनेत्रेश्रस्तुकाणो
निष्कलधामप्रथापरोभवस्वाहा स्वा १ ॐ ह्रूं
हैं ह्रूं भोः कवचश्रस्तुकाणो निष्कलधामप्र
थापरोभवस्वाहा स्वा १ ॐ ह्रूं ह्रः वषट् भोः
शिखेश्रस्तुकाणो निष्कलधामप्रथापरोभव
स्वाहा स्वा १ ॐ ह्रूं ह्रीं स्वाहा भोः शिरःश्रस्तुका
णो निष्कलधामप्रथापरोभवस्वाहा स्वा १ इति
प्रयोगेनैकैकयाहुत्या मंत्रानेकादशशोथयि
त्वाधिकारो विसृज्यताम् सकलीकरणत्वेन
नकदाचिच्छिशोः पुनःभवद्भिरभ्यस्यातत्वंसा
धकस्याशिवाज्ञया इति संश्राव्य योजनिकांकु
र्यात् आश्रित्य नित्यकुलकौलिसामरस्यंगुरोः
प्रविश्यपरशक्तिशिवाणवाख्योः मन्त्रोद्धारवि
धिंदेशिकदृष्टिपाताच्छेदेपदेभवतुयोज
निकास्थिरावः साचगुरुपुस्तकेषुयथा इति
कृत्वायोजनिकांकुर्याच्छेषपरेशिवे आवेशात्कु
लजाकौलसाराद्वासामरस्यतः विश्वमयहृद
याकाशेशाम्भवाक्रोपनीदृशा आलम्ब्यवा
परास्यानंदाद्दिव्याशाक्तयादृशा प्राणस्पर्शा
दानवाधाव्यापिनीस्फारमस्फुरत् इतित्रिधा

कला
दी
१२५
125

दृष्टिपाताद्वेधयोजनिकाशिशोः अयमर्थः
परोशिवेआवेशः शिवरूपत्वमहमेवपरःशि
वः इतिगुरुदृढभावनोदृढीयान् कुलज
आवेशः शक्तिरूपत्वंयावन्नशिवस्यशक्तिस्व
रूपचारिणीभवतितावत्तामपिकुलीकर्त्तुंनावि
भुःसमर्थः कुलेश्वरीभवःकौलःआत्मावेशः
यावन्निश्चलमात्मानंनस्याप्यतेतावन्नध्यातं
शक्तिरितिशिवशक्त्यात्मानमेकीभावंविधाय
स्पर्शांभवीशक्तिमाश्रित्यपाशविमोचनार्थं
कोधिन्याद्दृशाशिष्यंवीक्षेत् ततोमेधायोभा
गेपरस्यानमुच्यते तत्रशाक्तोशक्तिमाश्रित्याशि
शोयमोचितोमया इतिज्ञादिन्याद्दृशाशिष्यंवी
क्षेत् आणंनिश्चलीकृत्याणवीमवस्थामाश्रित्य
व्यापिन्याद्दृशाशिष्यंपरममन्त्रतन्त्रपादादिद्वा
दशांतंयावद्वीक्षेत् इतित्रिधादृष्टिपातायोज
निकाभवतीतिगुरवः अस्तोहितस्याशिष्यस्य
गन्धमाल्यार्चितस्यच एककर्णिकांतंचचार्यः
स्वात्मवन्नाडिमध्यतः तत्रगुरुःस्वदक्षिणना
साग्रेणनिरीय शिष्यस्यवामेनपुटंप्रवि
श्यतत्रपुटदिकर्णिकायाम् स्पृष्टाशेषमलं

जीवं भावयेत्स्फटिकामलम् हंसात्मकच्छाकि
रूपं नैर्मल्यं वामलाहतिम् संलक्ष्य कर्णिकामं
तकलनापदसंगिनम् तत्रप्रत्कर्णिकायां शि
ष्यात्मानं हंसाकारं तत्क्षणे शाक्तजलेन निवा
रितमलं संचिंत्य तत्स्वच्छतां तावन्मलाहत
जलं शक्तिरूपं भावयित्वा प्रत्कर्णिकायां ताह
र्ध्वगमनोन्मुखं संलक्ष्य योनिरोधिनीयन्त्रिस्थं च्छि
त्वा स्फाल्यप्रदम्बुजे संप्रापयेद्द्वादशान्तं साम
रस्यपदे कातः तमारव्ध्यकलाड्यक्तनासिके
नपध्याशिष्यम् प्राणं तामच प्रदियोजयामी
तिमुष्टिना मंत्रांते प्राणक्षेरेण प्रापय्य प्रदयं
निजम् ततः शिष्यात्मानं प्रदयाच्छिष्यद्वाद
शान्तं प्रापय्य तद्द्वादशान्ताच्छिष्यात्मानं स्ववा
मनासापुटमार्गेण मृष्टवादाय ॐ हूं अमुका
नेप्रदियोजयामि नमः इति स्वप्रदियोजयि
त्वासात्माकारो त्र चेन्नास्ति तदेवं कल्पयेदपि अ
भिन्नं भावयेत्प्राणं रथ्यारूढसुदानयेत् स्वप्र
दि शिष्यात्मानं स्वचेतन्यरथ्यारूढमूर्ध्वगमनो
न्मुखं भावयेत् संहाराणिमुद्राधारे वाक्रि बी
जे च जन्मगम् परास्थानं नाच्छ वर्णेनवबी

गेचकईगम् अत्रगुदादारभ्यतिकन्दस्थानेतं
त्वचैतन्यं विलोमस्थितस्त्राकारंभावयेत् कथ
मित्याह संहाराणीमुपरिमेरवौगुदे एवंविधं
तदुपरिशिष्यजीवं चिंतयेत् वाह्निबीजेन्द्रि
ज्यिकोलिंगाधोभागे परास्थाने मेढ्राधोभा
गे अनच्छवर्णोऽर्धचंद्राकारंरावबीजंक
न्दस्थाने नाडाधोभागे एवं प्राणवस्यचयोमा
त्रातिस्रो नाभिपद्मदानने विन्दो विंदुस्तथार्धे
दुर्धचन्द्रनिरोधिकां निरोधिन्यां नादस्तूर्ध्वां
नादे नादान्तभूमिका नादस्यांते शिखोर्ध्व
र्ध्वोशक्तौ शक्तिः स्वयंस्थिता व्यापिन्यां मा
लिनी शक्तिः समना समनापदे अभ्यंतरब
बाह्ये यंत्र चित्तिर्यात्स्थिते देहिनाम् साशक्ति
र्व्यापिनी वायप्रवाहः समनेति च तन्मना
चामनस्कस्याः षोडशोह्यन्त्यभूमिकाः पदा
त्मदं रेचकेन ततः समादशेपदे निरंजने शि
वस्थाने कलनां मनसा त्यजन् निर्विकल्पा
वोपयभूमिरभ्यस्येकं तथाश्रयेत् संहृत्याम
नितं शिष्यं तडित्ह्वालो ह्रदये कावत् दग्धपा
शो भवेच्छुद्धयामायामप्रदीपवत् एवं

ह्रकाराकारस्यचैतन्यरथारूढंशिख्यचैत
न्यमपिह्रकाराकारंतडिल्लेखोदयवत्मिति
तेध्यात्वानाभ्यादिद्वादशांतंयावत्प्राणवमा
ग्रासोमपानेष्विवारोहयेत् तत्रनाभौअका
रंहृदिउकारंआननेमकारंभ्रूमध्येविंदुंलला
टे अर्धचंद्रंललाटोर्ध्वनिरोधिनींशिरसि
नादंब्रह्मरंध्रेनादांतंशक्तिंत्वक्स्थांव्यापिनीं
शिखामूलस्थांशिखोर्ध्वांसमनांशिखांतस्थां
मुन्मनामूर्ध्वद्वादशांतंयावत्षोडशभूमि
काश्रपूर्णांसप्तदशानिं जनेद्वादशांतस्थे
परमशिवेव्योमाकारेसंचाशिखात्मानंलीनं
भावयेत् इत्यंतर्योजनिका इत्यंतरथवाप्रे
श्रोविदध्यात्क्रियामिमाम् समत्तादासवा
व्यानोनविधेःफल्गुसारता वासांतस्यप्रयो
गाच्छिवेच्छातोयतःफलम् आदायशर्णी
माज्येनस्रुचंशास्त्राविभावितम् पूजितालंकृ
तोध्यातोस्रुवेणशिवभावितः समपादशि
रोग्रीवःसमस्त्यायाशिवीभवेत् विधायविह्नि
नावौष्टोदन्तैर्दन्तानसंस्पृशेत् रसांकृतानि
तालुमध्यांहृशोर्दृष्टिंविकस्वराम् अनतोवह्नि

कला
दी०
१२७
127

गदाय दिव्यं करणमाश्रितः न्यस्तः शिष्यशिरो
सूत्रे मंडले श्रीघटेपि यः षडध्वाकल्कवस्त्रत्रव
न्मन्त्रपः स्त्रुचः पराक् सचिंत्य तारकाकारः शि
ष्यात्मा चाज्यमध्यगः पश्यंती रूपया वाचाकल
यन्प्रणवज्ञानैः पूर्णाहुत्या समं मन्त्रं सन्ततेचा
तरात्परम् स्तुतमुच्चारयन्त्याश्रिपरे शैवे निरं
जने योजयाम्यमुकं वौषडिति पूर्णां प्रदापये
त् ततः शिष्यनाडीं गुरुपादादौ विन्यस्य स्त्रुवं
सौवर्णमौक्तिकाद्यलंकृतां कृत्वा शक्तिरूपां
ध्यात्वा ओं ह्रीं शक्तये नमः इति संपूज्य ओं हूं
शिवाय नमः इति शिवं स्त्रुवं च संपूज्याज्येन
स्त्रुचमापूर्य स्त्रुचोपर्यधोमुखं स्त्रुवं कृत्वा दि
व्यकरणमादाय शिष्यगुरुमंडलसूत्राग्निक
लशेषडध्वानमादाय स्त्रुचि कल्कवल्लग्नं सं
चिंत्य शिष्यात्मानं च स्त्रुगग्राज्यमध्यगं कृत्वा
पश्यंत्या वाचाकलयन्प्राणायामिषकलान्तरं
द्वादशमात्राप्रयोगेन स्तुतमुच्चारन् ओं हूं
अमुकात्मा: परशिवे निरंजने योजयामि वौ
षट् इति शनैः शनैर्धारापातं कृत्वा पूर्णां दद्या
त् शिष्यात्मानं स्फुरत्तारकाकारं व्याप्तिलीनं

ध्यायेत् प्रायेदाज्यशेषेणदार्घ्यायपरमेप
दे उदानेबोधयन्मनागन्येनात्मानिरोधयन्
उच्चारणासमर्थत्वात्मन्त्रंनादात्मनाश्रयन् म
न्त्रासामान्यरूपंस्वमन्त्रसन्धायपातयेत् आज्य
स्यसन्ततांधारांयावन्नादान्तभूमिकाम् साहि
योजनिकामन्त्रंसन्धायमनसागुरुः बिन्दूमि
कावशेषेयंशर्णोद्दन्युपमेश्रयेत् मंत्रस्यको
टिशर्णोयाश्चावमानंनियोजयेत् एवंमन्त्रा
त्ररसान्तभूमिमानादान्तयोजिता सम्मिनावि
दृशान्तकोस्यागोदोहमात्रकम् सम्मीलि
तेसविनयंस्रुक्रयेकल्पतेशिशोः प्रमाणमा
गमाश्चात्रयद्दक्रासर्वविच्छिवः आसमंता
द्रमयतिप्रामोत्यकेनदर्शयन् विश्वंश्रोतरि
हस्वार्थानिरुक्तस्तेनचागमः इतितत्रायम
र्थः पुनरेवमेवद्वितीयांशर्णोद्दल्लीयात् क
थमित्याह सर्गादिपुष्यादिगन्धग्रहणावना
साघटेन ॐहुंकारप्रयोगेनांतःप्राणवायु
नीनोदानात्मोवायुःमपुटःस्यात्तस्मिन्युप
डेसतिनिष्कलस्यपश्यंत्यावाचोच्चैरुच्चारण
ना नदंतेशिष्यनामशल्लीयात् ॐहुंश्रम

कला
टी:
१२८
128

कंशैवेपरेधामनिनिरंजनेयोजयामिवौषट्
इतिशनैःशनैर्गोदोहमात्रंधारापातंकुर्यात्
यथाज्यधारापततितथातथाज्यमध्याच्छिष्या
त्मास्फुरत्तारकाकारऊर्ध्वंगत्वाव्योम्निशैवप
देलीनोभवति पराशिवोक्तागमंप्रमाणंज्ञात्वा
वश्यंशिष्योमोक्षपदंलभते इतिगुरवः इतिद्वि
तीयापूर्णा च अथान्यत्र च तत्रशिष्यमहेण
नाडयित्वाव्योम्नस्तदात्मानंशिष्यद्वादशांतक्रमे
णशिष्यहृदिशिष्यचैतन्यमवतार्यशिष्यहृदया
त्तदात्मानंवियोज्य तद्द्वादशान्तंयावदाकृष्यत
द्द्वादशान्ताच्छिष्यात्मानंस्रष्टोगृहीत्वावामनासा
पुटमार्गेणस्वहृत्कर्णिकायांनिवेशयेत् ततः
शेरस्थितःसमपादोनाभिस्थानेस्रुचंन्यस्यमूला
ग्रपर्यन्तोग्रंस्वंनिहितस्रुचामग्रंदत्तपूर्णाहुत
पूर्णांसाशिवशक्तिभावितमादायनादोस्मात्
त्पारतः प्रसारितग्रीवःस्तब्धदृष्टिरेकाग्रचित्त
स्थिरःशान्तोऽहमेवपरोहंसःशिवःपरमकार
णम् मन्मानोसचपरमात्मालीनःसमरसीग
तः अहमेवपरंतत्त्वंपरापरविभागतः इति
चोक्तदशापराभावसमन्वितः कुम्भमंडलव

क्लिस्वात्मशिखेभ्यः षड्विधमध्यानं गृहीत्वा तंच
त्रिचिकलशगाण्डिकायुतदंडिकायुतदंडवेदि
काग्रमुवेष्ठगर्भीकृतेतराधकलापंचकमुवेन
समारोप्यमध्यमप्राणगेचात्मनः संचिंत्यक्रम
शः समतया विष्वं ध्यायेत् शनैः शनैर्हृतयाग्रे
पानयेत् तत्राग्निष्वात्मानं स्वंच मनोमध्यवाहि
नि प्राणे योजयेदिति प्राणविषुवत् १ कंठताल्वा
दिक्रमेण अकारोकारमकारादिद्वादशमात्रोल्ल
नेष्वात्मापरापरविभागेनोन्मन्यंतं यावन्मंत्रं क्र
कारमुच्चारयेदिति मंत्रविषुवत् २ सप्तमान्मा
गेण शिवोन्तं यावन्नादेवाहयेदिति इति नाद
विषुवत् ३ एवादिशक्त्यंते चारे षड्विंशदंगु
लेषडंगुलप्राप्याब्रह्मादिकारणषट्कं त्यक्त्वा
क्रमेण प्रशांतलयं कुर्यादिति प्रशांतविषुवत् ४
ब्रह्मरन्ध्रावस्थितशक्तिमध्यगमनादस्योर्ध्व
मनान्तं यावत्संचारणाच्छक्तिविषुवत् ५ प्रा
णान्तीया षोडशीतदित्यस्यायमर्थंच षट्काष्टा
विंशत्युत्तरशतभागो त्रुटेपमात्रंकालतोद
शतमुसाष्टभांगुलपरिमाणंतच्चत्रिधाकृत्वा
प्रथमममपरं कालस्य षोडशमवयवं शक्तिम

कला
दी
१२५
129

ध्येत्यस्माद्द्वितीयं सप्तदशं पराख्यं व्यापिन्यां तृ
तीयं परापरमष्टादशं परार्धसंज्ञं समनायां त्यजे
दिति कालविषुवत् ९ समनायाः परत उन्मना
यामात्मानं योजयेदिति तत्त्वविषुवत् ७ इत्थं
विषुवत्सप्तकं ध्यात्वा शरकं क्रमकं च कृत्वा दिव्य
करणबन्धे तद्द्वादशमंत्रवर्णात्मकप्रमेयानु
लंघ्य विंदत्कर्णतालुषु अकारोकारमका
रानुलंघ्य बिन्दौ भ्रूमध्ये विद्यातत्त्वे शेषवाच्यवा
चकं विभागाविस्पष्टप्रकाशात्मनि विश्रांतिस्थान
त्वात्सन्निस्थितः ततोर्धचन्द्रो ब्रह्मरंध्रावस्थित
नादनादांतशक्तितत्त्वः शनैस्ततो व्यापिनी वहि
ष्करणेः सर्वज्ञत्वे तत्समनांतः शिखो मूले कर
णे इति षट्त्रिंशत्तत्त्वकल्पितात्मविद्याशिवाख्यो
परत्रितत्त्वः शुद्धात्मोन्मनाद्वादशांतपरशिवरू
पपरत्रितत्त्वतत्त्वाशिवशास्त्रात्मनि शिष्यं स
मर्प्य ॐ हूं अमुकाणुम् आत्माविद्याशिवाख्येत्रि
तत्त्वतत्त्वं परशिवशास्त्रात्मनि योजयामि वौष
ट् इति तृतीया पूर्णा शिष्यात्मानं स्वप्राणे प
कीकृत्य प्राणं कृत्वा थोरे च समं कृत्वा मूलमन्त्रमु
दीरयन् शिष्यस्यात्मनोर्ईकारेतडिदाकारेण

ऊर्ध्वप्राणात्रपिणीनाभावस्थितेलयंभावयित्वा
वस्तधाराप्रयोगेणाहुतथारांपातयेत् नाभि
स्थानात्तुचोष्मलेनासाग्रेयावच्छनैःशनैर्नय
न्हकारंनाभेर्हृदयंयावद्वितास्तिंव्याप्यसंस्थितं
ततःपरमकारंब्रह्मवाचकंहृदयादूर्ध्वंचतुरंगु
लंततोष्टांगुलंकंठगमकारंविष्णुवाचकम् तत
श्चतुरंगुलंतालुगमकारंरुद्रवाचकं ततएका
दशांगुलंभ्रूमध्यस्थंबिंदुमीश्वरवाचकं ब्रह्मरं
ध्रांतावस्थितंसदाशिववाचकम् नादंतत्र
एकांगुलंब्रह्मरंध्रमध्यस्थांशक्तिंवक्ष्यांव्यापि
नीकेशाग्रलस्थांसमनांत्यक्त्वाबोधरूपेणयोज
येत् उन्मुक्तदशामनोव्यापारशून्यंउन्मनाचिन्मात्र
मानांसमनोर्ध्वेशून्यात्मसत्तामतुरीयतुर्यातीत
पदावस्थोगुरुःकुर्यादनुग्रहम् एकोच्चारेण
शिष्यस्याक्रियामप्यपरित्यजन् आत्मतत्त्वंत
तस्यकाविद्यातत्त्वेनियोजयेत् उन्मनासातवि
शेयाऽनुत्तरावतांशुद्धचिदात्मिकांतुर्यरूपांश्र
मिशुद्धांछ्यद्वादशांतेपरशिवतत्त्वेभावशून्येम
नोतीतेनित्यगुणोदयेपरमानन्दलक्षणेविली
नेशिष्यात्मानंसर्वविधोधारांज्वालांतेपरमाशि

कला
दी
१३०
130

वाकारेमहाशून्यालयेवह्नौतुंचभावयेत् अ
थदेहमंत्रप्राणात्माशिवानामेकत्वकारणी
वह्नितन्त्रिकोमकारणी ॐह्रूंअमुकंपरमशि
वंतत्वेयोजयामिवौषट् इतिप्रयोगः इतिनिर्बी
जसबीजभेदकाचार्यसाधकानांसाधारणीयो
जनिकासमासा ॥ अथबालमूर्खवृद्धरोगि
स्त्रीणांदीक्षायांयोजनिकैतावतीपर्थः तेषामा
त्मानंगुरुःपरमात्मराजस्त्रीत्वाग्निशिखोकल्पं
शिखादिमूलेनयोजयेत् ततःसाधकाचार्य
योरयंविशेषः यः पुनःपारमेश्वर्यशक्तनाडीनोमं
त्राराधनसमर्थः परस्योपदेशदानेशक्तः साध
कउच्यते यस्तुतत्वविस्तारमैश्वर्यगुरुःसमस्ता
चारगुणैरन्वितस्सआचार्यउच्यते इत्थंयोजनि
कांकृत्वापुनर्योजनिकास्थिरतायतत्तुचमाज्ये
नपूरयित्वाद्वादशांतवहिष्ठकुम्भकंकृत्वाश
नैःशनैराज्यधारांत्यजेत् नादमयमूलादिवौ
षडन्तपूर्णयाशिष्यात्मानःशिवसामरस्यंस्थि
रंकुर्यात् इतिद्वितीयापूर्णा यामाद्यःप्रयोगः
तत्रसाधकस्यायंप्रयोगः ॐह्रूंअघोरेभ्योथ
घोरेभ्योघोरघोरतरेभ्यश्चसर्वतःसर्वसर्वेभ्यो

नमस्तेरुद्ररूपेभ्यो ह्रूं ॐ अमुकसाधकं शिवेयो
जयामि वौषट् आचार्येन ॐ ह्रूं अमुकाचार्यप
दपरे योजयामि वौषट् पुनरेतयोः सबीजपुत्र
कत्वे ॐ ह्रूं अमुकाणोः शेषप्रत्यर्थपुरतनसह
ष्टिं करोमि वौषट् इति तर्पणीयाहुतयो ततो मंत्रो
च्चारणं प्राणवायुशक्त्या धारणामात्मत्वकोटिमील
नेकार्यम् इति पुत्रकः ततः शिष्यात्मानं परमा
त्मतां गृहीत्वा अशिशिवो कल्पं शिष्यदक्षिणे
न योजयेदिति योजनिका अथ गुणापादनम्
तत्र साधकस्याणिमादिगुणाष्टकापादनम्
आचार्यस्य सर्वज्ञत्वादिगुणषट्कापादनम्
आदौ तावत्साधकस्य यथा ॐ ह्रूं अमुकात्मन
णिमागुणवान्भव स्वाहा आ २ एवं महिमा
गुणवान्भव स्वाहा आ २ ईशितागुणवान्भव
स्वाहा आ २ वशिता प्राकाम्य भुक्ति मुक्ति
गुणवान्भव स्वाहा आ २ ॐ ह्रूं अमुकात्मने अ
णिमागुणवते स्वाहा आ २ एवं लघिमा म
हिमा ईशिता वशिता प्राकाम्या भुक्ति आ
चार्येन ॐ ह्रां अमुकात्मन् सर्वज्ञो भव स्वाहा आ
१ एवं तृप्तमये भव स्वाहा आ १ ॐ ह्रूं अनादि

बोधो भव स्वाहा श्रा १ ॐ हैं स्वतन्त्रो भव स्वाहा
श्रा १ ॐ ह्रीं अलुप्तशक्तिर्भव स्वाहा श्रा १ ॐ ह्रः
अनन्तशक्तिर्भव स्वाहा श्रा १ एकैकाहुत्या उ
णषट्कमापादयेत् पुनरपि मूलेन तिलैर्वी
हिभिनाहुतीः तिस्रः पंचदशैकावा दद्यात् तद्य
था ॐ ह्रूं अमृतकात्मने सर्वज्ञाय स्वाहा श्रा १
एवं तृप्ताय अनादिबोधाय स्वतन्त्राय अलु
प्तशक्तये अनन्तशक्तये स्वाहा श्रा १ ततो मू
लमंत्रेण सांगेन विध्युर्ध्वपात्रं समभ्यर्च्य अमृतेश
मुद्रयामृतीकृत्य १ २ ३ अमृतेश्वरभैरवाय व
षट् नमः इति सप्तधा ज्ञानखड्गेनालोड्य स्वहृद
शान्ते चंद्रमंडलं ध्यात्वा परामृतमन्ते तो मथि
त्वा तेन विध्युर्ध्वपात्रं पूरितं भावयेत् ततो मू
लेन शिष्यब्रह्मरन्ध्रमभिषिञ्चेत् तद्द्वारेण
ब्रह्मरंध्रेण शक्त्यामृतं प्रविष्टं भावयेत् इति प
रमामृताभिषेकं शिष्यस्य कुर्यात् मंत्रशक्ति
भिरुग्राभिः शोषनिर्दहनादिभिः शरीरं शो
षितेनाभिस्तदर्थमभिषेचनमिति नीत्या त
तो दर्भनाडीं विमुच्येति शिष्यं नाडीं विमुच्य पु
ष्पाणि शिष्याय दद्यात् उदं पुष्पं पाणिनोष

कं मण्डपे देह्लीत्यस्त्वा द्वाशिष्यः पुण्यस्थाने
मद्रापयेत् अथ मन्त्रोपदेशविधिः कलशा
ग्रे गत्वा कलशे भगवन्तं सम्पूज्य एवमेव या
गांश्च शिष्येण सह गत्वा शिष्यमुत्तराभिमुखं उ
पविश्य शिष्यस्य वामे स्वयमुपविश्य यागे
देवं संपूज्य मूलेन त्रिः पठित्वा विशेषार्घपात्रतः
शिष्यशिरसि जलबिन्दुं क्षिपेत् ततो मन्त्रपूज्ज
येन नेत्रपटं शिष्यो बद्धा मूलाङ्गैः शिष्यं जलो
मणिमुक्तास्वर्णादियुते जले भगवन्तं साङ्ग
वक्त्रं सम्पूज्य गुरुर्यथाशक्ति जपं कृत्वा शिष्य
स्य नेत्रपटं विमुच्य जानुनी भूतले कृत्वा विज्ञ
प्तिं कारयेत् ॐ भगवन्नतमव्येशसंसारासरन
मस्कृत यथाशक्ति जपं पूजां शरणागमदद्य
ग्रहात् ब्रह्मादयोऽपि देवेशत्वत्संकुशचो
दिताः सृजन्ति त्रिजगत्सर्वकाले रक्षन्ति च प्र
भो विनाशयन्ति च तथा बालाः क्रीडनकानि
व तेऽपि ब्रह्मादयो देवा यान्त्यायान्ति च कालतः
संसारार्णवमग्नानां त्वमेवोद्धारणात्तमं अत
स्त्वां स्वामिनं विदयमेकमाश्रित्य निश्चयात् नि
कलत्वपदप्राप्त्यै करोमि मावित्लाः क्रियाः शि

कला
दी॰
१३२
132

धंसमयांश्रावयेत् दयाक्षमादमः सत्यमहिं
साप्यलोलता भक्तिरार्जवतामैत्रीशुक्तिः सदा
चारपालनम् असंस्पर्शस्वभावानांधैर्यस्थैर्य
मधीनता प्राणान्तेवाङ्मनःकायैः शिवेशिता
स्तषोडश इतिसमयान्संश्राव्य शिष्यस्यवा
मकर्णेमन्त्रोपदेशः कार्यः तंसगुरुपाणिंत्रि
स्यविभोप्रदक्षिणत्रयंदंडप्रणतिंचगुरुरिदं
ब्रूयात् विभुनात्वगृहीतोयस्त्वंनिमाविष्णमा
मकीम् गुरोदेवेनलेमंत्रेभक्तिंदेवस्यवर्धयेः
भगवन्नतनभक्येशशरणागतवत्सल दीना
यांमेस्यशिष्यस्यप्रसादंकुरुशंकर भोगंमो
क्षंनथारोग्यमायुर्वीर्यधनंगृहम् प्रजांशुर्णां
यशः सर्वंसर्वतोदेहिमेप्रभो इतिविज्ञप्य
शिष्योगुरुस्वरणपंकजेशिरसास्पृशन्नितिब्रू
यात् नमामिसद्गुरुंशांतंप्रत्यक्षंशिवरूपि
णम् शिरसायोगपीठस्थंमुक्तिकामार्थसि
द्धये

दीद्रः काकिनीदयाद्दशग्रामाग्रनाधिपः
दशग्रामाधिपस्यैकंनिर्लोभेनात्मनागुरोः इत्यु
क्ता तस्मिंस्तुष्टे जगत्तुष्टमित्याचार्यभक्त्या प
र्णम्यपरितोषयेत् अथपश्चैतन्यसम्पर्कमा
लिन्यशंकाशुद्ध्यर्थंगुरुरप्यात्मनो दीक्षांकुर्यात
ॐह्रूं षडध्वानमुपस्थापयामिनमः एवंषडध्व
नागच्छागच्छेत्यादिनाविरूपावावाहनादि ॐह्रूं
षडध्वानंविरूपोसन्निधापयामिस्वाहेत्या २ ॐष
डध्वाधिपतयः कारणेशाश्रागच्छथम् षडध्वा
दिकारणेशेभ्योनमः ॐषडध्वाधिपतिभ्यःका
रणेशेभ्यःस्वाहा श्रा २ तर्पणम् युष्माकम
धिकारेस्मिन्नात्मानंदीक्षयाम्यहम् विधिच्छि
द्रोपशान्त्यर्थमनुकूलैर्हिास्यताम् ॐह्रूंसम
स्तभुवनगतविचित्रशरीरव्यापिकेवागीश्व
र्यागच्छागच्छपूजनेनमः तर्पणेस्वाहा श्रा २
ॐह्रूंश्रात्मानंवागीशीगर्भेश्रात्मनःषडध्वनि
नानाशरीरेषुद्धगपत्कर्मनिष्पत्तिंकरोमिस्वा
हा श्रा २ एवंजन्मनिष्पत्तिं अधिकारनिष्प
त्तिम् कर्मार्जननिष्पत्तिंस्वाहा भोगनिष्पत्तिं
लयनिष्पत्तिम् ॐह्रूंममात्मनोः ॐह्रूंवागी

कला
दी
१३४
134

शीगर्भेघटध्वनिनिहृतिकलायोनानाशरीरेषु
निष्कृतिरस्तुस्वाहा श्रा १८ एवं प्रतिशादिप्र
त्येकं १८ ॐ हूं मम आत्मनो वागीशीगर्भेपाश
च्छेदोस्तुस्वाहा श्रा ३ ॐ हूं मम आत्मनः कर्मत्र
यशुद्धिरस्तुस्वाहा श्रा ३ ॐ हूं मम आत्मनः पा
शत्रयशुद्धिरस्तुस्वाहा श्रा ३ ॐ हूं मम आत्मनो
मलत्रयशुद्धिरस्तुस्वाहा श्रा ३ कलाशुद्धिरस्तु
स्वाहा श्रा ३ तत्वाध्वशुद्धिरस्तुस्वाहा श्रा ३
भुवनाध्वशुद्धिरस्तुस्वाहा श्रा ३ वर्णाध्वशुद्धि
रस्तुस्वाहा श्रा ३ मन्त्राध्वशुद्धिरस्तुस्वाहा श्रा
३ शिवोच्छेदोस्तुस्वाहा श्रा ३ आत्मचैतन्ये
घटध्वनउद्धरामिस्वाहा श्रा ३ आत्मनः स्वच्छ
त्वं करोमिस्वाहा श्रा ३ कारणेशागच्छतम्
कारणेशेभ्योनमः कारणेशेभ्यः स्वाहा श्रा ३
कारणेशेभ्यः स्वर्गर्यष्टकांशार्पणं करोमिस्वा
हा श्रा ३ कारणेनाब्रह्मादिरुद्रो मम शिवा
ज्ञया प्रतिबन्धः प्रकर्तव्यो यान्तः पदमनामयं
इति संश्राव्य सम्पूज्य सन्तर्प्य कारणेशाः क्षमध्व
मितिविसर्ज्य क्षमस्वदेवदेवेशिस्वात्मार्पणवि
दितामया इदानीं नोपरोद्धव्यं गच्छस्वे विसृवि

रूपम् इति विज्ञप्य विसर्जयेत् ॐ षडध्वापरत
त्वलीनो भव स्वाहा श्रा ३ ॐ हूं ममात्मनस्तत्त्व
त्रयशुद्धौ विधिन्यूनातिरेकमन्त्रोच्चारवैलोम्य
मनोविज्ञानकैवल्यदोषशुद्धिरस्तु स्वाहा श्रा
३ ॐ हूं ह्रां ह्रीं हूं ह्रैं ह्रौं ह्रः लवरयहेतिमंत्रै
कादशकपरधामप्रथापरमेस्तु स्वाहा श्रा
३ ॐ हूं स्वात्मानं परमतत्त्वे योजयामि वौषट्
इति श्रुण्णं ॐ ह्रां स्वात्मन् सर्वज्ञो भव स्वाहा
स्वात्मने सर्वज्ञाय स्वाहा श्रा ३ एवं तृप्तः त
माय अनादिबोधः अनादिबोधाय स्वतन्त्रा
स्वतन्त्राय अलुप्तशक्तिः अलुप्तशक्तये अ
नन्तशक्ति अनन्तशक्तये इत्येकैकया गुणप्र
दकापादनम् इत्यात्मदीक्षासंस्कारः अथाभि
षेकः शुभ्रान्तनात्तविरमाणवकार्ममाया
ज्ञानं मलत्रयमयं समयं निवार्य आनन्दवा
रिपरिपूर्णतराधिसिद्धचैतन्यसद्गुशिवतीर्थ
मस्त्वाभिषेकः अथाभिषेकं आचार्य शिवयो
गादनन्तरम् इत्यागमोक्ता आचार्यः शिष्य
मभिषिंचेत् तत्रादौ स्वनतत्रलग्नदिनेकापि
लागोमयत्रेनाग्निभस्मदष्टकदष्टनति

कला
दी॰
१३५
135

लदूर्वापिष्टामलकचन्दचंदनकुंकुममर्घ
पत्राभिः शिष्यमभिषिञ्चेत् तत्रायं विशेषः
बालवृद्धेह्यातुरस्त्रीभोगिनामभिषेको ना
स्तिचेत्क्रियते तदेकमेवकलशंमूलेन संस्पृश्य
तानभिषिंचेत् साधकं तु पंचभिरेवकलशैर
भिषिंचेत् तत्रादौ द्रव्यसंभारविभागो यथा
तत्रादौ मृदष्टकं यथा पर्वत हलोत्कृष्ट अ
श्वस्थान गजस्थान संगम वाल्मीक वृषको
त्कृष्ट हृदेभ्यः अथ रत्नाष्टकम् सुवर्णं वज्रं
मौक्तिकं रजतम् ताम्रम् राजवर्त्तिकम् प
द्मरागम् विद्रुमम् अथौषधयः बला शारि
वा वचा जयन्ती विल्व मज्जा पुनर्णवा कु
मारी शतावरी व्याघ्री गिरिकर्णी धात्री अ
भया सुवर्णलता अमृता वीरा मोटा विष्णु
कान्ता ब्राह्मी कुशा शंखपुष्पिका कुष्ठी
मांसी हरिद्रे द्वे पृश्नी शंखाभिधा तथा विल्व
मज्जा देवदारुर्नागकेसरमेवच शैलेयं चाप्य
कस्तूरावचाखर्जूरमुत्पलकम् वटुकावटुप
र्णाजीवनीयगणस्तथा पद्मचारिणीड
वीरुध्याः सर्वौषध्यः प्रकीर्तिताः पंचगव्यम्

अक्षतलाजासर्षपाः कुसुमाणि विचित्राणि
रसषट्कम् पानषट्कम् लोहसेसकत्रपुषे
त्यलकांस्यताम्रमनः शिलाभंगारिका इत्ये
वं द्रव्याणि सम्भृत्य अग्निसमीपे सदलेपव
मेव द्रव्यैः पूरितं अस्त्रघटं कुर्यात् ततः कल
शमंडलयागवह्निषु शिवं यथाशक्ति पूजये
त् अघोरान्तर्पयेत् ततः शिवाज्ञां याचयेत् अ
भिषिंचामि देवेश साधकं त्वत्तवाज्ञया नाना
विधानां मंत्राणां सिद्धिर्भवतु महेश्वर अभिषिंचा
मि देवेशि साधकं त्वच्छिवाज्ञया शिष्यानुग्र
हणे शक्तिरस्त्वस्य महेश्वर इत्याज्ञां गृहीत्वा
सांगं सावरणं मस्त्रघटं निर्विघ्नतावगाहाय पू
जयेत् तद्यथा ॐ हूः फट् गणपत्यस्त्राय हूः
फट् ॐ हूः फट् सौरास्त्राय हूः फट् ॐ हूः फट्
ॐ हूः फट् नारायणास्त्राय हूः फट् ॐ हूः फट्
ब्रह्मास्त्राय हूः फट् ॐ हूः फट् ब्रह्मशिरोस्त्राय
हूः फट् ॐ हूः फट् अस्त्राय हूः फट् ॐ हूः फट्
वायवास्त्राय हूः फट् ॐ हूः फट् लोकपालास्त्रा
य हूः फट् ॐ हूः फट् नागास्त्राय हूः फट् ॐ हूः
फट् पर्वतास्त्राय हूः फट् ॐ हूः फट् गरुडास्त्रा

कला
टी·
१३५
136

यह्रः फट् ॐ ह्रः फट् दिव्यास्त्राय ह्रः फट् ॐ ह्रः
फट् सर्वास्त्राय ह्रः फट् ॐ ह्रः फट् दुर्भेद्याय पाशु
पतास्त्राय ह्रः फट् ॐ ह्रः फट् चोदनास्त्राय ह्रः फ
ट् ॐ ह्रः फट् अस्त्राय ह्रः फट् ॐ ह्रः फट् अनंत
शक्तये अस्त्राय ह्रः फट् ॐ श्लीं पशु ह्रूं फट् पाशु
पतास्त्राय फट् ॐ हृदयाय फट् श्रीं शिरसे फ
ट् स्वाहा ॐ पां शिखायै फट् वषट् ॐ श्रूं कवचा
य फट् हूं ॐ ह्रूं नेत्रेभ्यो फट् वौषट् ॐ फट् फ
ट् अस्त्राय फट् ततः एवं एकैकया हुत्या स्वाहा
न्तेन हुत्वा श्लोंगे कृत्वा दीपन मुद्राभिमधु सन्दो
मेन देवतां तर्पयेत् ॐ ह्रूं ह्रूं ह्रूं फट् मन्त्रमुद्दीप
यामि स्वाहा ॐ हं ह्रां हं फट् हृदयमुद्दीपयामि
स्वाहा ॐ हं ह्रीं हं फट् शिरउद्दीपयामि स्वाहा
ॐ हं ह्रूं फट् शिखामुद्दीपयामि स्वाहा ॐ हं ह्रैं हं
फट् कवचमुद्दीपयामि स्वाहा ॐ हं ह्रौं हं फट्
नेत्रमुद्दीपयामि स्वाहा ॐ हं ह्रः हं फट् अस्त्रमु
द्दीपयामि स्वाहा ॐ हं हं हं ईशानवक्त्रमुद्दीप
यामि स्वाहा ॐ हं यं फट् तत्पुरुषवक्त्रमुद्दीप
यामि स्वाहा ॐ हं रं हं फट् अघोरवक्त्रमुद्दीपया
मि स्वाहा ॐ हं वं हं फट् वामदेववक्त्रमुद्दीपया

मिस्वाहा ॐ ह्रं लं ठं फट् सद्योजातवक्त्रं गृह्णी
पयामि स्वाहा श्रीपूर्वे विनायकस्यैव विघ्न
प्रशमाय यादाव र्घ्यांहोमा विस्तृकम् ततग्रह
यदक्षस्नानवेद्यं करोत्गुरुरभिषेकमंडपंया
यात् अथाग्नेयदिशि शालिपूर्णेनसाधकवि
षयेकमलपंचकं विधायईशपूर्वदक्षिणप
श्चिमोत्तरमध्यमे विध्यर्घ्यपात्रम् तत्रगुरुरु
पविश्य तत्र पूजासदने अर्घ्यार्घ्यपात्रं कृत्वा
तेन सर्वद्रव्याण्यभ्युक्ष्यादिङ्मातृ प्रभामंड
लद्वारपूजां नित्यार्चनवद्विधाय प्राणायामः
शोषणादहनादिमानसयागः ततोमध्येमं
त्रार्घ्यपात्रपूजानेनसर्वद्रव्यप्रोक्षणम् स्वात्म
पूजां धूपदीपादिसंकल्पं विधायस्ववामेगुरु
पूजां कृत्वा पंचेषासनपद्मे संपूज्य आज्ञां
गृहीत्वा लं पृथिवीतत्त्वायनमः ॐ ह्रां निवृ
त्तिकलायैनमः ॐ ह्रां निर्वृत्तिकलाधिपतये
ब्रह्मणेनमः ह्रां जाग्रदवस्थायैनमः ह्रां सृ
ष्टिकृत्यायनमः लं सद्योजातवक्त्रायनमः
इति पश्चिमकलशे ततउत्तरकलशे वं ज
लतत्त्वायनमः ह्रीं प्रतिष्ठाकलायनमः ह्रीं प्र

कला
दी
~~१२७~~
१३७
137

तिष्ठाकलाधिपतये विष्णवे नमः ॐ ह्रीं स्वप्ना
वस्थायै नमः ॐ ह्रीं स्थितिकृत्यायै नमः ॐ वं
वामदेववक्त्राय नमः इत्युत्तरकलशे दक्षिण
कलशे ॐ वं तेजस्तत्वाय नमः ॐ ह्रुं विद्याकला
यै नमः ॐ ह्रुं विद्याकलाधिपतये रुद्राय नमः
ॐ ह्रुं संहारकृत्यायै नमः ॐ रं अघोरवक्त्राय नमः
ॐ ह्रुं सुषुप्तावस्थायै नमः इति दक्षिणकलशे
ॐ यं वायुतत्वाय नमः ॐ ह्रैं शांताकलायै नमः
ॐ ह्रैं शांताकलाधिपतये ईश्वराय नमः ॐ ह्रैं तु
र्यावस्थायै नमः ॐ ह्रैं मोहकृत्यायै नमः ॐ यं त
त्पुरुषवक्त्राय नमः इति पूर्वकलशे ईशानक
लशे आकाशतत्वाय नमः ॐ ह्रः शांत्यतीता
यै नमः ॐ ह्रः शांत्यतीताधिपतये सदाशिवा
य नमः ॐ ह्रः तुर्यातीतावस्थायै नमः ॐ ह्रः
अनुग्रहकृत्यायै नमः ॐ हं ईशानवक्त्राय नमः
इत्यैशानकलशे ततो अघोरमंत्रेण सांगवक्त्रे
णाघोरेश्वर्या सहितेन प्रत्येकं कलशपंचकं पू
जयेत् ततो घोरमंत्राष्टोत्तरशतजपेन प्रत्ये
कं कलशपंचकमभिमंत्रयेत् इति साधकवि
षये पुनराचार्यविषयत्वेयं विशेषः अष्टस

दिक्षुकलशाष्टकंसंस्थाप्यमध्येनवमकलशो
परिशिवंस्थापयेत् तत्राग्रपरिवत्सजनंकृत्वा
आग्नेयकलशे आत्मतत्त्वायनमः इच्छाशक्ति
येनमः नैर्ऋतकलशे ॐज्रंविद्यातत्त्वायन
मः क्रियाशक्तयेनमः वायव्ये ॐसःशिव
तत्त्वायनमः ज्ञानशक्तयेनमः मध्येशांतो
तेरंरंरै परमशिवतत्त्वायनमः परमशक्ति
येनमः पंचविधकृतकृत्येनमः सर्वावस्था
तीतायनमः आदौपूर्वकलशे ॐह्रांसदाशि
वतत्त्वायनमः ॐफ्रींअनंतायनमः ॐरांसी
रैंनंदिनेनमः गभीरदकायनमः ततआग्ने
ये ॐईश्वरतत्त्वायनमः ॐकुंसूक्ष्मायनमः
स्वाहृदकसमुद्रायनमः ततोदक्षिणे ॐ
लंविद्यातत्त्वायनमः स्त्रौंमहाकालायनमः
ॐशिवोत्तमायनमः ॐस्त्रेंकुंकुमारायन
मः मान्यिताव्ययेनमः अथनैर्ऋते ॐमंमा
यातत्त्वायनमः ॐकुंएकनेत्रायनमः शर्करा
समुद्रायनमः गंगणपतयेनमः ततःप
श्चिमे लंकालतत्त्वायनमः द्वंरुद्रायनमः
ॐब्रोंवृषभायनमः घृतसमुद्रायनमः ततो

कला
शी
~~१२८~~
१३८
138

वायो वंनियतितत्वायनमः ऌं त्रिमूर्त्तयेनमः
ॐस्त्रींमंगेशायनमः दक्षिसमुद्रायनमः तत
उत्तरे ॐयंतत्पुरुषायनमः ॐक्रूं श्रीकंठाय
नमः ॐसः अम्बिकायै दुग्धसमुद्रायनमः
ततईशाने मंकृतितत्वायनमः ॐशंस्त्रीशिखं
डिनेनमः ॐस्त्रूं वरएउंधरायनमः ॐ स्वारस
मुद्रायनमः ततोमध्येशंवोंतरेनिष्कलंसां
गेनिहस्मादिकलाकारणंपंचकंकृत्यपंचकं
चयष्टा सर्वेषांकलशानांशिवंसांगंसावरणं
विधेशाद्यावरणसमकसहितंप्रजयेत् म
ध्येकंकलशंनिष्कलाष्टोत्तरशतजपेनाभि
मंत्रयेत् मंगलद्रव्यैः प्रजयेच्च ॐवंवाम
देवायनमः इत्यादि ॐलंसद्योजातायन
मः इतिमृद्भिः ॐयंतत्पुरुषायनमः तीर्थ
मृदा ॐलंईशानायनमः संगमतटमृदा
ॐक्रूं अनाथिवोधायनमः हलोत्कृष्टमृदा
ॐहैंस्वतंत्रायनमः गजस्थानमृदा अनंतश
क्तयेनमः वाल्मीकमृदा ॐह्रांसर्वज्ञायन
मः क्षेत्रमृदा ह्रींतप्तायनमः नदीमृदा
रंअघोरायनमः भस्मना लंसद्योजाता

यनमः गोमयेषु यंरंलंवंलंवङ्केभ्योनमः
पंचगव्येन । शिवकनवायनमः पयसाशंवि
यंतत्पुरुषायनमः मधुना रंअघोरायनमः
घृतेन लंईशानायनमः रत्नाम्भोभिः ईईश्व
रनत्वायनमः हेमाम्भोभिः ततः पूर्वादिक्रमे
ण कलशाष्टके पृथक् पृथक्कलशेषु द्रव्यानि
वेशो यथा तत्रादौ पूर्वे श्वेताख्ये कलशे लंलिति
मूर्तये नमः इतिचन्दनम् आग्नेये विमलाख्ये
कलशे रंअग्नये नमः इतिहेमादिधातवः दक्षि
णे सुरभिनाम्नि कलशे शंयजमानाय नमः
इतिगन्धाम्भः नैर्ऋते माणिभद्राख्ये कलशे षंसू
र्याय नमः इतिरत्नाम्बुभिः पश्चिमे फलवति
कलशे वंजलाय नमः इतिफलम् वायौ कौ
समाख्ये कलशे यंवायवे नमः इतिपुष्पम्
उत्तरे समस्याख्ये कलशे सोंसोमाय नमः इतिस
र्वधान्यानि ऐशान्यां ओषधिनाम्नि कलशे
हंआकाशाय नमः सर्वौषधयः मध्ये शंशिवस
र्वमूलांगैः प्रपूरयेत् इतिकलशेषु द्रव्यप्रपूरणम्
ततो पाद्यार्घ्याचमनीयनैवेद्यजपस्तुतिभिर्ग
न्धं संस्नाप्य ऐशानकोणादिकरांचतस्रोम

विज्ञानांषष्ठंचोल्लिखितांवेदीत्यस्य तदुपरिस
कला हृत्दलेभद्रपीठेस्तात्तदूर्ध्वंन्यस्तानन्तात्मस्ता
टी नन्तानेशिष्यंपूर्वाभिमुखमुत्तराभिमुखंवाउप
१२९ विश्य परज्योतिर्मयेनात्मानंशिष्यंसंवीक्ष्यरे
चकेनशिष्यहृदयंप्रविश्य तस्यहृदयात्तदा
139 त्मानंमूर्द्धपाशत्रयमलत्रयरहितंस्फुरत्तारका
कारंद्वादशांतेप्रापय्यस्वकरपुटेगवस्थाप्यशो
षणादीनिकुर्यात् तद्यथा ह्रुं शिष्यतनुंशो
षयामिनमः सूर्यरूपंप्राणंसंचिंत्यशिष्यश
रीरंशोषयेत् ह्रुं शिष्यतनुंदाहयामिनमः
दक्षिणपादांगुष्ठेनकालाग्निंध्यात्वा तज्वाल
याभस्मीभूतंभावयेत् ॐ श्रुं शिष्यतनुंतत्प्लाव
नीकरोमिनमः शारीरंभस्मादिगतंभावयेत्
वेतनुमाप्लावयामिनमः तस्यानंताल्लिंगंभा
वयेत् पुनर्वैदस्मान्तममृतांगोशिष्यतनुंदिव्यां
विभाव्य शिष्यस्यकन्दाधःशक्तिमाधारिकां
नाभौधात्रींतदुपरिकलनापदेपयोराशिः ए
रितःसंकेसरकर्णिकांध्यायेत् ॐ ह्रुं ह्रौं ह्रुं
शिष्यात्मानमवतारयामिनमः इतिशिष्यजी
वंद्वादशांताद्वतार्यकलशोपरिशिष्यात्मा

नं ज्योतिर्मयं ध्यात्वा ॐ लं सद्योजातमूर्तये नमः
इति मूर्तिभूतं सकल्यात्मतां ज्ञाने रात्यायचेत्
वामे वेटकरन्यादिध्यानेन ताशिष्यात्मानं शिवरू
पं ध्यायेत् तथा शिवीभूतस्य शिष्यात्मानो मन
सा न्यासं कुर्यात् वक्रां गन्यासं कलान्यासं च
संक्षेपेण ॐ लं तारादिभ्यः ईशानकलाभ्यो न
मः इति मूर्ध्नि ५ ॐ यं शान्तादिभ्यः तत्पुरुषक
लाभ्यो नमः वक्त्रे ४ रं उमादिभ्यः अघोरकला
भ्यो नमः हृदि वं रजादिभ्यः वामदेवकला
भ्यो नमः गुह्ये १२ लं सिद्धादिभ्यः सद्योजा
तकलाभ्यो नमः पादयोः ८ ततः पंचकला
न्यासः ॐ ह्रः शान्त्यतीताकलायै नमः मूर्ध्नि
ह्रैं शान्ताकलायै नमः वक्त्रे ॐ ह्रूं विद्यायै न
मः तालुनि प्रतिष्ठायै नमः नाभौ ह्रां निवृ
त्यै नमः पादांगुष्ठे इति मनसा शिवीभूतस्य
शिष्यात्मानो न्यासं विधाय शिष्यात्मानं शिवी
भूतं मनसा शिववत् पूजयेत् एवं शिष्यशरी
रे बहिःन्यासं कुर्यात् शिष्यशरीरमपि शिव
वत् ज्ञात्वा पूजयेत् एवं शिष्यार्चां विधाय अ
स्त्रमंत्रेण ॐ ह्रः फट् इति करेभ्यो नमः इति

कला
दी
~~१२~~
१४०
140

निर्भर्त्सनमूर्ध्वगतांसमासदीपिकाग्निकोम
कुंसगोमयदूर्वासिद्धार्थकादयितोयैःपूर्णांवि
धीमयित्वाबहिः लिपेत् प्रामेलग्नेप्राणेसह
मैौवावाह्निनिसभूर्यंशांखैर्वेः समाविलामर
मयकलशात्कराभ्यामादायशिष्यमभिषिंचे
त् आगमोक्तैर्मन्त्रैर्वैदोक्तैस्वमंत्रैः राजानंदीक्षि
तंवेदोक्तैःविल्वपर्णादिपौराणिकैरभिषिंचेत्
नचागामिकैरितिगुरवः परमाशिवशक्तिस्वरू
पा अविथवानारीरोशितजवनिकाप्रान्ताः
वामायैनमः ज्येष्ठायैनमः रौद्र्यैनमः काल्यैन
मः इतिमंत्रैःसंपूज्य कलांकलांशतायित्वास्वरा
णांकलशःकृतः इतिनीत्यातस्यतस्यघटस्यहि
तस्य कलशाष्टकस्य मूले ब्रह्मणेनमः मध्ये
विष्णवेनमः गलके रुद्रायनमः कुक्षौ सप्तद्वी
पकायनमः कुंमायांपंचाशत्संख्यानदीःस्मरेत्
पूजयेच्च तद्यथा अंगंगायैनमः आंसिन्धवेन
मः इंयमुनायैनमः ईंसरस्वत्यैनमः उंवीणा
यैनमः ऊंचर्मण्वत्यैनमः ऋंअरुणायैनमः
ॠंइरावत्यैनमः ऌंताम्रायैनमः ॡंनर्मदायै
नमः एंभगभद्रायैनमः ऐंगोदावर्यैनमः प

प्रभायैनमः ऐंमातंगिन्यैनमः ओंभीमायैनमः
औंविशालायैनमः अंविमलायैनमः अः विपा
शायैनमः कंशतरुद्रायैनमः खंसरय्वैनमः
गंगोमत्यैनमः घंचित्रपथायैनमः ङंकौशि
क्यैनमः चंभोगवत्यैनमः छंभारवत्यैनमः जं
नीलवासायैनमः झंवितस्तायैनमः ञंचंद्रभा
गायैनमः टंत्रिममायैनमः ठंक्षिकुल्यायन
मः डंइक्षुगायैनमः ढंत्रिदिवालयायैनमः णं
लांगुलिन्यैनमः तंवंशधरायैनमः थंकृतमा
लायैनमः दंताम्रपर्ण्यैनमः धंपुष्पजायैनमः
नंउत्पलाक्षैन्यैनमः पंशीतोदकायैनमः फंगि
रिवक्त्रायैनमः बंसप्रकारायैनमः भंवक्रायैन
मः मंकावीर्यैनमः यंसक्रमायैनमः रंमाल
गायैनमः लंमन्दवासिन्यैनमः वंत्पमालाये
नमः शंऋशिर्यैनमः षंमन्दाकिन्यैनमः संदशा
र्ण्यैनमः हंतमसायैनमः ळंपिप्पलायैनमः
क्षंश्वन्यैनमः ळंवैतरिण्यैनमः लंकुमुद्वत्यैन
मः लंतोष्ण्यैनमः लंमनशिलायैनमः ओंपुष्क
रायनमः लंप्रभासायनमः वंगयाशीर्षाय
नमः टंनैमिष्यायनमः तंमानसायनमः पंब

कला
टी॰
१४१

धिराश्रमायनमः यंदे ञ्रोपदेवेभ्योनमः ग्रंपी
ठपीठेस्वरेभ्योनमः वीजेभुवनस्पतिवर्गायन
मः कुम्भोपरिवस्त्रहृदयेधर्मायनमः स्रवर्गाव
क्रयेनमः सर्वांगेष्मेरवेनमः पृथिव्यैनमः
ग्रासनेशक्रायनमः पाद्येवरुणायनमः ग्रर्घे
प्रजापतियमाभ्यांनमः नैवेद्येसूर्यचंद्रमोभ्यां
नमः दीपेभौमबुधाभ्यांनमः धूपेबृहस्पतिशु
क्राभ्यांनमः गंगोदके शनिराहुभ्यांनमः माल्ये
ग्रष्टोकुलनागेभ्योनमः नमस्कारेसर्वव्यापिने
शिवायनमः सकलकलशंस्पृशेत् एतत्सजा
दिकंसाधकाचार्ययोःसाधारणम् पुनःसाधक
विषयेयंप्रकारः ग्रघोरमन्त्रंपठन्गुरुः कलशा
च्छिरःप्रान्तंनीत्वा ग्रादावस्त्रकलशेनाभिषिंचे
त् ग्राचार्यविषयेतुगुरुः निष्कलमन्त्रंपठन्क
लशात्वारंवारंद्वादशांतंनीत्वापरशान्त्यमन्तंसं
तोभ्यास्त्रकलशंपातयेत् पश्चिमकलशंकर
द्वयेनगृह्णीत्वैवमेवललाटांतंद्वादशान्तंनीत्वा
नीत्वासाधकविषयेघोरंपठनाचार्यविषयेनि
ष्कलमन्त्रंजपन्तंमन्त्रंचसशहृंजपन्धारापा
तंकुर्यात् कथमित्याह ब्राह्मीशक्तिःपंचमे

यानिवृत्तिः तन्मंतस्यां पार्थिवमेकमेव आगत्यै
वं सान्निध्यानंभजंती शिष्येभ्याख्येयसे मंगला
य कलाग्निकुष्मांडकदाह्नकाख्याः शर्वो विस
र्पिपिप्रुतोघरुद्राः ब्रलोंडमध्ये भुवनेश्वरस्ता
मेतेभिषिंचंतु सर्वोपचास्तु(?)ः शाक्यांकपालेश
प्रताजब्रभासवज्रदेहः परिमर्दनश्च ततो विश्व
त्यक्ष्यशास्त्रप्रकाशपिनाकिप्रकः(?) त्रिदशाधिप
त्यः एतेभिषिंचंतु मंगलायस्तुः साधकस्या
प्यथै देशिकस्य अघोरेषणाख्यो लवधार्यनन्तः
सक्रोधनः स्यादथमारुताशी उडम्बराख्यो अस
नस्तथेशः फलेंद्रनामा सह वज्रदेहः एतेभिषे
कोद्भवमत्र सर्वे दिशान्त(?) वो मंगलमाशुरुद्राः स
र्वेन्द्रविद्याधिपसर्ववेदपारंगमज्ञानभुजः सुरेशाः
ज्येष्ठः सहेशानबलिप्रियाभ्यां सत्कृतपालो गु
वनेश्वरास्ते एतेभिषेकोद्भवमाशु सर्वे दिशंतु
वो मंगलमाशुरुद्राः निधीश्वरोत्रपवदाख्यय
सौमसौम्यदेहोपि जटाधरोन्यः लक्ष्मीधरोरत्न
धरोथकामी सोम्यप्रसादः प्रविभासकश्च
एतेभिषेकोद्भवमाशु सर्वे दिशंतु वो मंगलमा
शुरुद्राः श्रीच्छोलद्रूर्वीन्द्रथोपसलक्ष्मीतान

कला
दी
१४२

142

शुक्लोपि भयानकाख्यः पंचांतकः पंचशिखः
कपर्दी समेघवाहोर्ध्व वनेश्वरास्तुः एते भिषेको
द्ववमास्तु सर्वे दिशन्तु वो मंगलमाशु रुद्राः बलो
ति शर्वः सच पाशहस्तो महाबलः श्वेतजयादि
रुद्रो स्यादीर्घवाहुः ध्वजलोतकश्च समेघनाद
श्च नादकाख्यः एते भिषेकावसरे त्र पुण्ये दि
शन्तु वो मंगलमाशु रुद्राः स्यानैर्ऋतो मारण
हन्तु शुक्लः सङ्कर हट्टिश्च भयानकाख्यः तथो
र्ध्वकेशश्च विरूपनेत्रो धूम्रस्ततो लोहितदंष्ट्रिनो
च एते भिषेकावसरे सुपुण्ये दिशन्तु वो मंगल
माशु रुद्राः याम्यः समस्तः सहरोषधाता विधा
तकर्ताख्य शुतो हि दत्त संयोक्तृ शुक्लोच वियो
क्तृधर्मो वधर्मपश्चेति तिन वा हि नाथाः एते भिषे
कावसरे सुपुण्ये दिशन्तु वो मंगलमाशु रुद्राः
ततो ग्निरुद्रः सहुताशनश्च सपिंगलो धो ज्वल
नो हरश्च सभोदकाख्यो दहनश्च बभ्रुर्भस्मांत
कोन्यः क्षयशर्वको सौ एते भिषेकावसरे सुपुण्ये
दिशन्तु वो मंगलमाशु रुद्राः शंभुर्विभुः स्याद्
गणाधिपश्च त्र्यक्षस्तथा त्रिदशेश्वरश्च संवा
हयुक्तश्च विवाहनामा नभः स्थलि सत्रि विलोच

नस्य एतेभिषेकावसरे स्वगुणोपदिशयन्त्वो मं
गलमाश्रुरुद्राः वर्णाः लकारोद्भवजामन्त्रीशे
वाधेशस्मिन्वितनेशिष्येभ्यः एतेभिषेकावसरे
स्वगुणोपदिशयन्त्वो मंगलमाश्रुरुद्राः प्रणव
यवलमतराः ह्रूह्रूद्भवलमतराह्राः यरूय
शैलातत्त्वचाकिलमतराः ह्रवऊइतिवस्वविंश
तिरत्नमन्यदानाम् भवत्विभवतांस्वमंगलातत
एवमेवोत्तरः कलशाभिषेकोयथा प्रतिष्ठाकला
चार्ये साधकं वापि सिंचेत् नववर्णोपदेशुक्ता
मंगलानि ददातु ते अमेजोनिविलानिगन्धरस
यारूपं तथास्पर्शयुक्ताहोलिंगगुदेचपादकरवा
क्रासारसालाहरशाः वक्रश्रोत्रेग्रथचित्रगर्वापिष
णास्त्रहनुणाः स्वस्वयोपेतश्चाम्मितोत्रतनवनि
वहोदिशपान्तरे मंगलम् गुणाष्टकं स्यादमरेश्वर
स्वप्रभासकोनेमिषगुणकरोच आषाढिदण्डि
ख्यगुनोथभारभूतिस्तथान्योलकुलेकतावे एते
भिषेकावसरे स्वगुणोपदिशयन्त्वो मंगलमाश्रुरु
द्राः हरिश्चन्द्रोथश्रीशैलोजाल्पिरातास्रकेश्वरः
महाकालोमध्यमस्वकेदारोभैरवस्तथा अतिगु
लाष्टकमतेनेजस्तत्त्वेनयास्थितम् नवेदिशयत

कला
दी
[illegible]
[illegible]
143

शिष्यायमंगलमभिषेकजम् वाग्भुतवेगवोना
मकृतेच्चंतनाबलः ततःकनखलोनामविम
लश्चाहृष्टामकः महेन्द्रभीमौगुह्यातिगुह्याष्टकं
तयास्थितम् ततेदिश्यतशिष्यायमंगलमभि
षेकजम् छागलाण्डेऽडराण्डश्चमाकोटोमंग
लेश्वरः कालिञ्जरःशंकुकर्णःस्थलेशश्चकोरथ
रः स्थाणवष्टकमिदंगन्धाद्‍ष्टकार्यैतमास्थितम्
ततेदिश्यतशिष्यायमंगलमाभिषेकजम् सम
नन्दकरालकः सुभद्रः समहर्यश्चविभूतिकोम्
तम्ब महन्तीसहस्रजेशनाभ्नाससर्योन्यष्टपूताः
पितामहेन दत्तामाभिषेकजानिसर्वेभवतांते
शुभमंगलानिरुद्राः योगाष्टकंस्यादकृतंकृता
त्वंसर्वैभवच्याल्लाणवेसवांश्च कौमारौमःप्रकृ
तस्थमेतच्छेकाष्टकेतिपुराणमथीशः पतेभिष
कोद्भवमत्रसर्वेदिश्यन्तवोमंगलमाशुरुद्राः श्री
कंठस्यनिदेशतस्त्रिसहिताश्चाष्टिशातिरुद्रादिकाः
दंतावर्णचयाद्गणत्रयमघोरावामःशिरोगणःशि
खाः पतेतेभवतांभवंतुसततंसन्मंगलादेशकाः
समन्त्राःपरमाभिषेकसमयेशर्वाज्ञयाश्रेयसे
ध्रुवः ॐ प्रथमतराः हृल्लोहल्लवयाःमरुव्रताः

लःपदविंशतिरेकयुक्तातिशपरीक्ष्याविति
मंगलाय ततोदक्षिणकलशाभिषेकः सात्ता
स्थितादक्षिणपात्रविद्याव्याप्याचिन्त्याकिल
सम्मतत्वी प्रमाणियुक्तासहितोथकालोरागः
सविद्यासकलाचमाया एतेभिषेकोऽड्डवमत्रस
वैदिशन्तवोमंगलमास्मरुद्राः पुंरागतत्वान्तर
नेन्तसूक्ष्मशिवोत्तमापकरोगेकरुद्रौ त्रिमूर्ति
कश्रीगलकौशिवेण्डीविद्येश्वराख्योष्टकमित्य
मर्च्यम् श्रष्टाभिषेकोऽड्डवमत्रसन्तंदिशयन्त्वोमं
गलमाश्रुप्रणयेम् वामाज्येष्ठारौद्रः कलाख्योः
कालविकरणाख्यबलविकरणबलप्रमथनोत
तोपरः सर्वभूतदमनाख्यः नवमो मनोन्मनस्या
त्तैतन्नियतिविद्ययोर्नवकम् कालकलयोस्त्वदे
वौतेजाज्योतिर्महामन्त्रायाः सुः मायातत्वेगोप
तिनामाथस्ताद्यैविश्वः सतिलकः तमेशब्रह्मा
यीशानवाननन्तोन्योमध्यमीचदमितोपिष्ठाता
एतेरुद्राधिकारेभवनेभवनेसन्तिभुवनोसन्नि
धिकारास्तेत्रयक्षोदिशयन्त्वः शुभानिमंगलानि
वर्णाः समस्तकारतो य सविधं वर्मात्प्यघोरोम
न्त्रोमात्त्वान्तमियंचविंशतिरपिस्थाप्यापदा

कला
टी·
~~१२४~~
14.4

नोयथा दिशन्तु: शुभमंगलानि सहस्रकालेऽभि
षेकोद्भवान्याचार्यस्य साधकायच पोऽशैवेमा विसं
गता: ॐ लक्षभु: वलमला: ॐ हृदा: तथाऽयवा
श्वलमलप्सपदविंशतिरित्यसौ दिशयन्तु मंगला
नि इतिदशलिपो इति विद्याकलाकर्मण्युत्र साधक
विषये विशेष: ततईशानकलशाभिषेक: प
शानस्नानमपदगा: शांत्यतीता कलायां व्या
मं शान्त्यन्त व समरसं शिवमेकं तत्त्वम् एतस्मा
लाहृदयमभयदे संगतं शैवयज्ञे दिशन्तु ह्यत्राभि
षवणसमये संततं मंगलानि विन्दोर्नित्यर्द्धिप्र
भवोऽस्य पंच स्युरित्यिकाया अथ पंचनादे व्या
प्यादिकं पंचकमेव शक्तौ स्यात्सोऽउशान्ते समने
ऽस्मरोऽपि एतेभिषेकोद्भवमत्र सर्वे दिशयन्तु वो मं
गलमाशु रुद्रा: मः कारादया: षोडशैवात्रवर्णा:
ॐ कारादयं केवलं स्यात्पदं च नेत्राभिधो मन्त्र ई
शान इत्यं शक्यो हावो दिशयन्तां मंगलानि इती
शानकलशेन साधकाभिषेक: तत: सर्वकल
शेन साधकाभिषेक: शांताकलायामथ सर्व
गायां व्याप्याप्यिनास्याभिरूवारितत्त्वी विदेश
गात्वो सशिवस्य समनदशोपकल्याणिवरागि

वान्ता इत्याभिषेकोद्भवमत्र प्राप्यं दिशयन्त्वो
मंगलमाशु सर्वम् विद्यातत्त्वे त्रिगुणादि विद्या
राज्ञी पुरा ततः ऐश्वरे पंचदशकं यत्रैकं पुरमे
श्वरम् विद्येश्वरपुराण्यष्टौ धर्मादीनां चतुष्टयं
वामादिशक्तित्रितयं भुवनं चैककं ततः ज्ञान
क्रियापुरा चैकं तत्त्वे सदाशिवे पुनः साशिवा
दिकवक्त्रांगसकलाद्यष्टकावृतम् शिवरुद्र
पुरव्यापिसदाशिवपुरं संस्मृतम् इत्थं समादश
ध्वांतः पुराणि संतत्रेयसे खेखेकाष्टत्रयोवर्णाः
पुरुषास्ते च शाम्भवे रगेंद्रऋयवलमतारकाः
स्युः पदान्यथबीजो बिंदुयकारो हौमवेतोस्मिन्मा
रमेश्वरे अभिषेकोद्भवान्याशु मंगलानि दिशं
त्वः सद्योवामोऽघोरश्चईशानः पुरुषस्तथा
तेवरात्मयमन्त्राद्या मंगलानि दिशन्त्वः इति
साधकाभिषेकः आचार्यसाधकयोर्दक्षिणाक
लशांते साधारणोभिषेकः कलशद्वयेनायं वि
शेषः साधकस्य दक्षिणाकलशादैशानकल
शाभिषेकः ऐशानकलशात्सर्वकलशाभि
षेकः सप्रकारः साधकविषये प्रागुक्त आचा
र्यविषये तु आदौ सर्वकलशाभिषेकः इति

कला
टी
१२४
145

मंत्रैस्तत्सर्वमेवालिखितम् पुनश्चाचार्यस्य स
द्योवामोऽघोरश्चतत्पुरुषस्तथापरः ईशान
श्चत्वरयमन्त्राद्याः स्वभावहः ईशानः पुरु
षोघोरोवामः सद्यः कलाः श्रुताः हृदयावलमं
त्राद्या मंगलानि दिशन्तु वः सांगः सवक्त्रो भग
वांस्सदेवीकस्ससायुधः अभिषिंचतु वो देवः
सकलो निष्कलस्तथा तथैव भैरवाश्चाष्टौ भ
गवंतमनुव्रताः अद्याभिषेकसमये मंगला
नि दिशंतु वः विद्येश्वरा गणेशाश्च लोकेशा मा
तरोग्रहाः नागावज्राद्यस्त्राणीति मंगलानि दि
शन्तु वः सप्तकोटिस्तु मंत्राणां शिववक्त्राद्वि
निर्गताः अभिषेकोद्भवान्यद्दिशन्तस्तमंग
लानि वः इति शेषैः कलशैराचार्याभिषेकः इति
साधकं वाचार्यमभिषिंच्य मायीयं कंचुकं त्यजे
ति परमशिवप्रकाशपरीततात्माभिमनुभव
ति स्नानशाटींप्रत्याल्यनव्यवासो गुरुः परिधाप
येत् परिहितनूतनाम्बरस्तु यं शिष्यं पूर्ववत्सजित
शं एव करोगुरुः शिष्यं यागभवनं प्रवेश्योत्तराभि
मुखेसुपविश्य स्वयं तदग्रे पूर्वाभिमुखे सुपवि
श्य स्वात्मनि सकलीकरणं शिवहस्तं तं विधाया

चार्यीभूतं शिष्यं निष्कलधामोच्चारणपूर्वं शंखे
जलेनाभिषिंचेत् ततस्साधकं तत्राधिकारार्पणे
मस्तकेकुर्यात् तदनुशिष्यः सकलीकृतार्चिता
लंकृतस्य स्वकर्तृवस्त्रफलकवेदिकास्तत्रकरणे
योगपट्टद्वादशनाचोडशांगुलीकर्तरीद्वादशां
गुलांतास्यपसितोसीवासितच्छत्रपादुकादिराज्यो
पकरणमन्यन्मनसादद्यात् शंखोभिषेकस्सी
धंवर्जयित्वाचकर्तरीम् शेषाण्युपकरणानि
प्रयच्छेत्साधकायच ततस्सायिदंगुरुर्ब्रूयादाचा
र्याय अपिप्रत्यायिकृतिंकुर्यादीक्षायतुयत्
यिये वचतराश्रमसंस्थेष्वपिशिवाज्ञयाकिंचव
र्तेयाः स्वलोन्याज्ञपट्टोमेरत्नमनियमोन्वयंस्वशा
स्त्रस्य अविरुद्धंलौकिकमप्युपरिहरणंयःशास्त्रे
ण विहितंवाथविधिद्वेतन्स्वयमनुपालयतेन
थानुरूप्य योगेभ्यःशिष्टेभ्यस्वव्याख्येयंतयाश्रु
तंशास्त्रम् श्रोतव्यंवहुवहुशःस्वयमन्यस्माद्धि
शायचालम्बकम् दृष्ट्वाभक्तिवकवीर्याःअनुग्र
हेतनुशास्थनया विधिनाशिवादीनांवहिःप्रति
शंयथाविवेत्विषे दीक्षांव्याख्योशिवैकतांशा
स्वचिंतनेककणम् अत्रादिदानमितिचानुपाल

कला
दी
१५९
146

येस्तत्रसमकं शक्त्या शैवेन विधिना स्नानं
संध्यां तर्पणमर्जनम् विधिनाप्यर्हं कुर्याद्
शौचेऽहि न ह्रापयेत् तथा च शिवधर्मे सूतके
मृतके वापि नित्यकर्म न ह्रापयेत् यदि किंचि
त्यजेन्मोहाल्लोभाद्वा स्मृतिदर्शनात् शिवस्याष्ट
शतं जप्त्वा प्रायश्चित्तेन शुध्यति तथा च स्वायंभुवे
आदौ स्नात्वा ततः शैवीं संध्यां कुर्याद्धृताश्रमी
इतरस्त्वविरक्तात्मा शिवध्यानेकतत्परः स्नात्वी
कुर्यान्न वा कुर्याच्छैवीं कुर्यादतन्द्रितः नित्यं संध्या
मुपासीत लोपे चोपवसेद्दिनम् निरुजः सरुजो
वापि सद्योजातं शतं जपेत् एतत्सर्वं शिष्योपदे
शार्थं विनास्नापकापि पालयेत् बाढमिति
वदं शिष्यो हरिविभवेष्टयोष्टयोर्चिताय ज्ञानुभ्यां
पपां गत्वा निवेदयथा तथैवाद्यमामधिष्ठाय शि
ष्योयं तदङ्गन्तु विशेषतः सन्निधिं विधत्स्व जानु
भ्यां परणिं गत्वा समभ्यर्च्य भैरवं ततो विज्ञाप्य शिष्य
मुद्दिश्यापि दं ब्रूयात्तु कृताञ्जलिः भगवन्देवदेवेश
अभिषिक्तस्त्वदाज्ञया आचार्यपदसंस्थेन तत्वा
वेत्ताविधायिना कर्तव्येतद्यथायातमधिकारं
तद्देशिकात् शिवतत्वार्थकथनं शिवस्वरूपतः

स्थितः शिवेनाहं हृत्तीतो यमिति भावयेत्
विज्ञापयन्मन्त्रेशानं साधको यं मया कृतः कु
र्यात्तिहिं वदाज्ञानतस्त्रिप्रकारस्य भक्तितः इति
देवेनाज्ञां दत्तां विभाव्य निष्कलोस्त्रारं सर्वमाचा
र्याय पुष्पं पाणौ दत्वा साधकाय भवात्मनादंडव
त्प्रणम्य प्रदक्षिणीकृत्य हृष्टमदर्शयन्वहिर्नि
र्गच्छेत् निर्गत्याग्नौ मंत्रान्वक्त्रांगानि दशांशतः
सपरिवारं त्रिराहुत्या त्रिमधुप्लुतहुतेन संतर्प्य
मूलेन पूर्णां दत्वा पुनराचार्योथ निवृत्त्याद्याः क
लाः सनाथा दशदशाहुत्या तर्प्या यथा ॐ निवृ
त्तिकलायै स्वाहा श्रा ५ निवृत्तिकलाधिपतये ब्र
ह्मणे स्वाहा श्रा ५ प्रतिष्ठाकलायै स्वाहा श्रा
५ प्रतिष्ठाकलाधिपतये विष्णवे स्वाहा श्रा ५
विद्याकलायै स्वाहा श्रा ५ विद्याकलाधिपत
ये रुद्राय स्वाहा श्रा ५ शांताकलायै स्वाहा श्रा
५ शांताकलाधिपतये ईश्वराय स्वाहा श्रा ५ शां
त्यतीताकलायै स्वाहा श्रा ५ शांत्यतीताकला
धिपतये सदाशिवाय स्वाहा श्रा ५ इति संतर्प्य
तासामिदं ब्रूयात् तस्याधिकारिशिशोर्विघ्य
वं स्यतात् जानीत नायकाद् इति मूलेन पूर्णां द

कला
दी
~~१३०~~
१४७
147

ताविघ्नप्रणाम्यसंयोज्यं गणवटुकेन कनिष्ठादीनां
दर्भोल्मुकान्वह्न्याग्निनादीपयेदिति पाशच्छेदा
दिकर्मसस्वस्यदीप्तस्यत्ताभवति यावदन्यस्य
संक्रामितस्तावत्तद्वनाधिकारीयं पाल्यइतिब्रूया
त् प्राच्यगुरुर्नव्यगुरुमभिवादयेदिति सिद्धांतो
क्तिः न तु साधकमभिवादयेत् तेन साधकेन प्राच्य
गुरुरेवाभिवाद्यः अथ प्राग्गुरोः शिष्यैर्विनायका
दीनामग्नेस्तर्पणं कुर्यात् अग्निं प्राच्यगुरुर्णावदये
ति केचित् दिग्बलिभूतबलिमात्रग्रहतर्पणानि
कृत्वाचार्यः प्रतिकुर्यान्न देवी साधकवटुकादीनान्या
नाथकृपणादीं स्तोषयित्वा दूर्वासर्षपतिलाक्षतकु
सुमाञ्जलीन्कलशमंडलेवाग्निगेविभोगत्वा सफ
लं ममेदं ब्रूयादित्यर्पयेच्छिवम् इति साधकाचा
र्ययोरभिषेकविधिः ॥ अनन्तरं गणपत्यादीनां
मंत्रान्यथासंभवं संतर्प्य भगवन्तं विशेषपूजापवि
त्रारोहणोत्सवं नृत्तगीतवादित्ररहस्यार्चादिभिः
संतोषयेत् ॥ अथ पवित्रारोहणविधिः एकशि
ष्यविषये पवित्रं दशकं कार्यम् आदौ सम्पातः त
तो वीक्षणप्रोक्षणम् शिवाम्भसा कवचेनावगुण्ठ
नम् वर्मणावेष्टनम् वह्नितापनम् सम्पातहोमः

ततोर्चनं यथा ॐ प्रणवायनमः ॐ चन्द्रमसेनमः
वह्नयेनमः ब्रह्मणेनमः नागेभ्योनमः गुह्मायन
मः ॐ रवयेनमः सदाशिवायनमः सर्वेभ्योदे
वेभ्योनमः यथा ॐ शिवतत्त्वायनमः हं सदाशि
वतत्त्वायनमः ईं ईश्वरतत्त्वायनमः मं मायातत्त्वा
यनमः लं कालतत्त्वायनमः वं नियतितत्त्वायनमः
यं तत्पुरुषतत्त्वायनमः क्षं प्रकृतितत्त्वायनमः ॐ
पृथिव्यादिमायान्तव्यापकायात्मतत्त्वायनमः
ॐ विद्यादिसदाशिवान्तव्यापकायविद्यातत्त्वायन
मः सः शिवतत्त्वव्यापकायशिवतत्त्वायनमः ॐ ह्रूं
कपालेशभैरवायनमः ॐ ह्रूं शिखिवाहनभैरवाय
नमः ॐ ह्रूं क्रोधराजभैरवायनमः ॐ ह्रूं विकराल
भैरवायनमः ॐ ह्रूं मन्मथभैरवायनमः ॐ ह्रूं मेघ
नादभैरवायनमः ॐ ह्रूं सोमराजभैरवायनमः ॐ ह्स्म्ल्व्र्यूं
विद्याराजभैरवायनमः ह्रौं यां रौं ब्रह्माण्याष्टक
सहितायै ब्रह्माण्यैनमः ॐ ह्रीं ईं ह्रीं ईशान्याष्ट
कसहितायै माहेश्वर्यैनमः क्रूं कं क्रों ईं कृताशना
द्यष्टकसहितायै कौमार्यैनमः ॐ मं ग्रं सों ईं सर्व
ज्ञानरताद्यष्टकसहितायै वैष्णव्यैनमः ॐ स्लूं लं शं
ईं तालजंघाद्यष्टकसहितायै वाराह्यैनमः ॐ षं पं

कला
दी·
१४८
२४८
148

ईं ईं चम्पाद्यष्टकसहितायै ऐं ऍ नमः ॐ वौं ॐ वौं ईं वा
मन्याद्यष्टकसहितायै चामुण्डायै नमः लां अः लौं ई
यमजिकाद्यष्टकसहितायै महालक्ष्म्यै नमः ॐ लौं
अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं
चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं
वं शं षं सं हं ळं क्षं लौं मातृकायै नमः ॐ न ऋ ॠ लृ ॡ
ष च य ई ण ङ ऊ ब क ख ग घ ङ· इ अ व भ य ड ढ ठ फ ञ
ज र ट प फ ल आ स अः ह ष क्ष म श अं त ए ऐ ओ औ द फ
मालिन्यै नमः ॐ फ्रौं फ्रें फ्रं फ्रुं फ्रां ह्सः स्वाय स्व
यमवेत्रतं नियमेश्वराय स्वा [illegible] हा ॐ फ्रौं सः
पवित्रकमर्पयामि नमः इति संपूज्य
वित्तामिं कुर्यात् आमं वितो स्तिदेवांशिसह
देव्या सहस्रेणः मंत्रेशो लोकपालैश्च सहितः परि
वारकैः निवेदयाम्यहं तुभ्यं प्रभातेन पवित्रकम्
नियमं च करिष्यामि परमेश तवाज्ञया कलात्मना त
यादेव यत्कृतं मामके विधौ कृतं कृष्टं समस्तं कृष्टं ब
ते शुभं च सत्कृतम् न दत्तं कृष्टं अन्तं कृष्टं कृतं चेष्टं त
वाज्ञया सर्वात्मना अनाशंभो पवित्रेणा बदिच्छया
समस्तं ब्रह्मं महेशान पवित्रः पापनाशनः त्वयाप
वित्रितं सर्वं जगत्स्थावरजंगमम् खंडितं यन्मया

देवकृतं वैकल्ययोगतः एकीभवतु तत्सर्वं तवाज्ञासूत्रगुम्फितम् अपवित्रेच सर्वत्र पवित्रत्वप्रकाशकः अस्य हृत्स्थायतनमस्तु भव्यं पवित्रायाविदात्मने सर्वसंकरदोषघ्नीं सर्वलौकोत्ययातिनीम् शक्तिसूत्रपरिस्पन्दमहतां संविदं स्तुमः त्वंगतिः सर्वभूतानां संस्थितस्त्वं चराचरे अंतश्चारेण भूतानां द्रष्टात्वंपरमेश्वर कर्मणा मनसावाचा त्वत्तो नान्यागतिर्मम मंत्रहीनं क्रियाहीनं द्रव्यहीनं च यद्कृतम् जपहोमार्चनैर्हीनं कृतं नित्यं मया तव अकृतं विधिहीनं च तत्सर्वं मय महेश्वर ॥ इति पवित्रारोपणगणेशयागशांतिकलशब्रह्मविष्णुरुद्रकलेक्षपालेभ्यः शिष्यहस्तेदापयेत् एकं पवित्रं शिष्याय दत्वा तत एकं पवित्रं गुरुर्मूलेन स्वच्छ्ये आत्मन्यर्पयित्वा ॐ ह्रूं हर य २ मदेवब्रतं नियमेश्वरायश्रात्मविद्याशिवतत्वाधिपतये भैरवाय वौषट् इति स्मरेत् ॥ इति पवित्रारोपणविधिः ॥ एतान्पवित्रकस्थितमन्त्रान्स्थापितेनैकैकयाहुत्यासंतर्प्य सतत्त्वोको त्वमदृव्यहोमं कृत्वा विस्थिविभो प्रदक्षिणत्रयं कृत्वाष्टरोत्तरशतं पंकजेस्वष्टमंत्रतर्पणं कृत्वा ततो रत्नासनम् ह्रैं ह्रैं ह्रैं अमृतेश्वरभैरव असुकाशिष्यं सर्वोपद्रवेभ्यो रक्ष २

कला
दी०
१२९
१४६
149

हूँ हैं हीं वौषट् स्वाहा सर्वौषधीत्रिफलालाजाक्षसमय
वतिलतण्डुलादिघृताभिः आहुतयः १०८ वा ५४
वा २७ वा १४ एवं हीं हैं हूं अमृतलालिस्त्रुकमाधि
व्याधिभयाद्रक्षरक्ष हूँ हैं हीं वौषट् स्वाहा आहुतयो
भैरवादर्थाः इतिसर्वौषधिहोमंविधायमन्त्रजपेन
पूर्णांदद्यात् वैश्वदेवंकृत्वा नैवेद्यंनिवेद्य
निष्कलसकलस्वच्छन्दसदेवीकंसावरणं
नमः स्वाहा इतियथाशक्ति
..

ॐ ह्रूं शिष्यस्यवामेशरीरेभुक्तिमुक्तिफलंसम्पूर्णमस्तु
वौषट् इतिपूर्णांदधिभक्तेनैवदत्वा ॐ श्रीं श्रीं श्रीं
ह्रूं ह्रूं ह्रूं फ्रीं फ्रीं फ्रीं अनुलोमशान्तिरस्तु स्वाहा १ एवं
विलोमशान्तिरस्तु स्वाहा १ व्युत्क्रमशान्तिरस्तु स्वाहा
१ न्यूनातिरिक्तदोषशान्तिरस्तु स्वाहा १ अकृतदु
ष्कृतशान्तिरस्तु स्वाहा १ मनोवैलोम्यशान्तिरस्तु स्वा
हा १ वैकल्यदोषशान्तिरस्तु स्वाहा १ ततः समय
विधापूर्णांयथा मध्यप्राणेतिपठित्वा ॐ ह्रूं शान्त
ज्ञानप्रबोधप्रकाशात्मने ॐ ह्रां ॐ ह्रीं ॐ ह्रूं ॐ ह्रैं
ॐ ह्रौं ॐ ह्रः ॐ सः ब्रह्मात्मने ब्रह्ममूर्तये सर्वसमय
लोपान्निवारयनिवारयसर्वसमयान्स्मरय २ सान्नि

ध्यंकुरु २ अनुलोमविलोमव्युत्क्रमन्यूनातिरि
क्ताकृतत्रुटिजनशांतिंकुरु २ हूंफट्स्वाहावौषट्
इत्येका ततोद्वारेशानवेतिपठित्वा ॐहूंन्यूनाधि
कान्यथाकृतकर्मप्रायश्चित्तविधिप्ररणेमस्तवौ
षट् इतिद्वितीया वामेवेटेति अघोरेणवौषट्
इतितृतीया ततोऽग्निंसंपूज्य यथाशक्तिदक्षिण
यातोषयेत् कृत्वादितेत्रेशानर्पणांतंसमाप्य ततो
यागाग्रेगत्वाकिंचिदग्रस्थितान्मूलंवात्रुत्रादिग्रूत्वा
ॐहूंॐहूंशांतात्मनेप्रबोधप्रकाशात्मने ॐह्रां
ॐह्रीं ॐह्रूं ॐसः ब्रह्मात्मनेब्रह्ममूर्तयेसर्वसमय
लोपान्निवारय २ सर्वसमयान्पूरय २ शांतिंध्यंकु
रुकुरु ॐहूंफट्स्वाहा ॥ इतिसमयान्संपूज्यभग
वन्तंसमापयेत् भगवन्नस्यकर्मस्यन्मयायासि
तोभवान् तत्सत्त्वंतयादेवकृपयापरमेश्वर
विधिन्यूनमकाममस्यश्रजाशास्त्रोदितायथा नकुर्या
दितिभूयिष्ठाप्राकृतैर्द्रव्यविस्तरैः भक्तिमात्रंसमा
लम्ब्यविधानंयन्मयाकृतम् तत्सर्वंसफलंमेस्तुप्र
प्रसन्नेत्वयिप्रभो इतिविज्ञाप्य देवेशेनवरंदत्तंवि
भाव्य आज्ञामेदीयतांनाथनैवेद्यस्यास्यभक्षणे
शरीरयात्रासिद्ध्यर्थंभगवन्नहंनमर्हसि देवदेव

कला
दी.
४८.
२५०
150

स्वनैवेद्यं चान्द्रायणशताधिकम् यस्मै कस्मै अदी
क्षिताय न दद्यात् ओं ह्रः फट् नैवेद्यं मे रक्षंतु भूतगणे
शा इत्यस्त्रेण पिधानं कृत्वान्यत्र सुरक्षितं स्थापयेत्
पुनर्भगवते विशेषपूजनं चार्घ्यं प्रणिपातं पुनः पुनः
ततो निरोधार्घ्यशुद्धीतार्घ्यसव्यापसव्यतो दत्वा विस
र्जयेद्देवं यथा मममन्त्रमन्त्रस्मरन् दक्षकरेण निरोधार्घ्यं
पात्रतो दक्षिणोर्ध्वं दत्वा एवं वामकरेण वामे वेष्टितथ्या
ने स्मृत्वा विसर्जनमुद्रया चाणुदावादे कुर्वन्विसर्जयेत्
तद्यथा आत्मरेचकं कृत्वा नाराचास्त्रप्रयोगेन देवं
तः पुष्पं दिव्यमन्त्रान्संहारिण्यादाय विद्युद्ज्वलितान्त्या
त्वा वामदेहे सकलमहारके विन्यस्य नेत्रे च निष्कले
अकारादिमात्राप्रशमबुन्ध्याविन्दौ नेत्रनादनादांत
रूपे लीनं नादं शक्तिरूपं प्रणवहृदयसम्पुटितं संहारि
ण्या संगृह्य हृदशांते नियोज्य ततोपि पूरकेणाप्य
दि विन्यस्य सकलं हृदाद्विशार्णे सकलनिष्कलं च त
ष्कलमनघकरूपं सर्वरूपं सर्वस्थानस्थं हृदम्भोजे निर्वि
भावयेत् अत्र विशेषो विस्तरतो यथा आलवात्मरे
चकं ततः शरीरशोषणदहनादीनि च दिव्यदेहोत्था
दनं च विधाय क्रमशस्तत आदोपमोपरि भगवन्तं
चिंतयेत् तद्यथा त्रिपंचनेत्रं शरवक्त्रमाद्यं संपूर्ण

चन्द्रार्कत्रयरूपमीशम् चन्द्रार्धमौलिं दधतं नवा
मेभुजैः खट्वाङ्गाभयशूलरौच पाशं शरं सन्मकुटं ती
चदण्डं खड्गांगवीणां डमरुंश्च तद्वत् खेटं वरं चां
कुशां वज्रमसिं शूलं तथा खेटकपालिनीं च सर्वैः
कृतां च यन्त्रः त्रिशूलं सूर्यप्रभाकोटिजितप्रका
शं तथाभयं वामगया च देव्या युक्तं महाहारविक
हारभूषम् हृत्पद्मनस्थं कमलस्य मध्ये देवाधिदे
वं खेल चिन्तयामि इति मध्यपद्मे महेशानं सं
चिंत्य आत्मनो रेचकं कृत्वा नाराचास्त्रप्रयोगेन
मूलमंत्र मनुस्मरन्यागमध्ये पुष्पं प्रक्षिप्य प्रतिते
जोमया नानाविधान्संज्ञान्भगवन्मूर्तिसद्योजात
वक्त्रनेत्रीयनेत्राद्यना भगवन्मूर्तौ कल्पयत्य स्य सक
लभट्टारके इति तेजोमये प्रविष्टां श्चिन्तयेत् तम
पि निष्कलभट्टारके नानाविधमंत्रसंयुक्तं प्रति
तेजोमये संहारमुद्रयादाय प्रणवसंपुटितं
ॐ ऊं ॐ इति पूर्वादिक्रमेण द्वादशान्तं प्रापये
त् हृदि मकारं ब्रह्माणं त्यक्त्वा कंठे उकारं विसं
तालुनि मकारे रुद्रं भ्रूमध्ये बिन्दावीश्वरं अर्धच
न्द्रे निरोधने प्रशमनतुम्नाकारन्मा द्वहिस्वाविश
क्षेतनतोपि केशमूलस्थायां व्यापिन्यां ततोपि शि

क. ला
टी.
~~१०१~~
२५२
151

रोहलस्थायां समनायां ततोपि शिवोर्ध्वं तस्या
याउन्मनायामेव सर्वमंत्रगणां जितेनातिते
जोमयेन द्वात्रिंशार्णेन सकलभट्टारके मध्यप
द्मकर्णिकाचिंतितं भगवन्मूर्त्यूर्ध्ववक्त्रद्वादशांते
कंचित्कालं विश्रामयेत् ततोपि संहाररुद्रया
ॐ ह्रूं ॐ इति ध्रुवसंपुटितमंत्रतेजो भगवद्द्वाद
शांतादादायस्वात्मीयभोगद्वादशांतं नीत्वा स्थि
तिक्रमेण सृष्टिं विन्यसेत्कथमित्याह शिवो
स्थायामुन्मनायां ततोपि शिवोर्ध्वमूलस्थायां स
मनायां ततोपि केशमूलस्थायां व्यापिन्यां ततो
पि तलकस्थायां शक्तौ ततोपि करन्ध्रस्थानाभितःशि
वयाश्रि नादांते ततो ललाटस्थे सदाशिवया
श्रि नादे ततोपि भ्रूमध्यस्थे ईश्वरयाश्रि बिन्दौ ततो
पि तालस्थे रुद्रयाश्रि मकारे ततोपि कंठस्थे वि
ष्णयाश्रि उकारे ततोपि हृत्पद्मस्थे ब्रह्मयाश्रि अ
कारे ततो हृदि सकलभट्टारके द्वात्रिंशार्णेन सं
पूर्णं निष्कलभट्टारकं कुंभकेन प्राणरूपं चिंतयेत्
सकलं निष्कलं रूपं तथा सकलनिष्कलम् । त्रि
तावस्थं तु मंत्रे पूर्णरूपं तत्संहरेत्प्रिये सकलं द्वा
त्रिंशार्णं निष्कलं च नवाक्षरं षष्ठस्वरबिन्दुयुक्तं चन्द्र

युक्तं हूंकारं निष्कलं केवलमर्धमात्रं हूंकारमि
त्यर्थः इत्थं मंडलादेवं विसृज्य ॥ ततो हुंस्व
र्णादेया ॥ हुतेन स्रुचि स्वर्णीयां निधायाथो
शर्वं स्रुवम् स्रुगग्रे पुष्पमारोप्य पश्चाद्वामेन
पाणिना पुनः सव्येन तां कृत्वा शंखसन्निभमु
द्रया सम्पुटतोर्ध्वकायस्तु समपादः स्थितः
नाभौ तन्मूलमादाय स्रुगग्रन्यस्तलोचनः ब्र
ह्मादिकारणत्यागाद्विनिःसृत्य सुषुम्णया
वामस्तनांतमानीय तयोन्मूलमतंद्रितः तद
ग्रोज्झयादाज्यं यवसम्मितधारया यथा यथा
ज्यधाराग्नौ पतति तथा तथा वक्रेर्हृदादिक्रमेण
मंत्रं तेजो द्वादशान्तं प्रणवमात्रास्वारोहयेत् क
थमित्याह हृदिस्थकारे ब्रह्माणं त्यक्त्वा कंठे उका
रे विष्णुं तालनि मकारे रुद्रं भ्रूमध्ये बिन्दावीश्वरं
शिरसि नादे सदाशिवं कारन्त्रे नादांते नाश्रितशि
वमिति कारणषट्कं त्यक्त्वा भ्रुकुट्यां शक्तिं केशमूल
स्थां व्यापिनीं शिखोस्थां समनां शिखांतस्थामुन्म
नामुल्लंघ्याक्रम्य यागशिष्येभ्यो मंत्रगणसहित
मतितेजोमयं परमाक्षरवाक्षिस्थभगवन्मूर्ति
द्वादशांते परमात्मानं ध्यायन् ॥ पूर्णावसरे भग

कला
दी॰
१५२
152

वतः स्वच्छन्दस्य ध्यानं यथा ॥ ॐ ह्रां मनोहर
वक्त्रसमायतचक्षुषमष्टीशकृतस्थं पंचवदनं
सितकृष्णविरुचिरं शशिखंडमंडितापीडवेणम्
उद्यमनपाशविशिखोमनवरवेहांगवक्षकीय
णादणडुचनाभ्यां सत्कवरकलमिद्वामगा
ड्डनवकेन खड्गांकुशविशिखाभयकपालड
मरुत्रिशूलपविपरश्वधैर्दोर्भिर्नवभिः कल
यन्तं चिंतयेद्भगवन्तम् सितमुपरितनं वद
नं पुरतः पीतं च मेचकं दक्षं वाममरुणं सितरु
चिरुचिरं देवस्य पश्चिमं वक्त्रम् एवमुद्रासिता
शेषभगवद्देहशालिनीम् चिंतयेदस्य चोत्सं
गगां महागौरीश्वरीमपि ॥ ॐ हुं निष्कलस्वच्छन्द
भैरवाय स्वाहा वौषट् ॥ इति हृत्सर्गणं ॥ ततः
प्रविश्य ॐ हुं ॐ इति संहारमुद्रया वामस्य भ
गवद्द्वादशान्तान्परमशैवं तेजः स्वभोगद्वादशां
ताद्वरोहणक्रमेण स्वपदस्थं कृत्वा तत्र स्तजयेत्
ततस्तर्पणम् अनेन सकलनिष्कलभट्टारको
घोरेण सर्वसाधारणेनैव नानन्तेशादिपरमशि
वान्ताः सर्वे भुवनेशाः सपरिवाराः सन्तुष्टाः स
न्तुष्टा वरदाः सन्तु जन्मकोटिकृतं पापं परो

प्रकटं चयेत् तत्सर्वं नाशमायाति तमः सूर्योद
येयथा इति तर्पणं कारयेत् शुक्लातिशुक्लेतिहो
मनिवेदनम् वक्ष्ये समयां पूजयेत्सर्वेषां मंत्राणां
मेलापं यथा ॐ विश्वं ब्रह्माणं ब्रह्माणमीशाने ई
शानं कुबेरी कुबेरं वायौ वायुं वरुणे वरुणं नैर्ऋ
तेनैर्ऋतं यमे यममग्नौ अग्निमिन्द्रे तमपि विद्याग
जे विद्याराजं सोमराजे तं मे चनादे तं मन्मथे तं विकरा
ले तं क्रोधराजे तं शिविवाह्ने तं कपालीशे तमस्त्रे
स्त्रे नेत्रे नेत्रं कवचे कवचं शिखायां शिखां शिरसि शि
रो हृदि हृदयं सद्योजाते तं वामदेवे तमघोरे तं तत्पु
रुषे तमीशाने तं शाक्तौ शाक्तिमघोरे मंत्रे ऽघोरं निष्क
ल एवमेव मंत्रसंयुक्तमतितेजोमयं निष्कलमहा
रकं संहारमुद्रयादाय प्राग्वद्दक्षौ चिन्तितभगव
न्मूर्तिं पश्चिमवक्त्रतृतीयनेत्राध्वनात तत्तुल्यत्वेनमपि
तेजःपुंजं सर्वमंत्रमयं चिंतयेत् ॥ भस्मनालला
टमनुलिप्य ॥ ॐ शिवभक्तयजमानस्याच्छिद्रं मा
भक्तराचन देवदेवप्रसादेन रक्षारक्षाममेभस्म शं
श्वाग्निरिति भस्म वायुरिति भस्म व्योमेति भस्म स्थलमि
ति भस्म जलमिति भस्म सर्वं ह वा इदं भस्म नापूताति
चतुर्विध भस्मानि भवति सर्वतीर्थस्नानफलं भवति

कला सर्वकर्मच्छिद्रं भवति इति शिष्याणां भस्मनाति

दी लकं कुर्यात् पुनरस्त्राय शांतिकलशात् ॐ हः फ

१५३ ट् शिवाग्निर्विघ्नं चामिः हः फट् २ इति स्रुचाचनार्द्रि

लपात्रपात्रे त्रिः कुर्यात् ततोऽग्निविसर्जनं कुर्यात्

तर्पितोसि विभो मया होमेनानलमध्यतः होमद्र

153 व्येषु यद्वीर्यं तत्सर्वमात्मसात्कुरु होमेन तर्पितोसि

प्रभोऽग्निमध्ये वदान्यया होमद्रव्योद्भवं वीर्यं स्वात्म

नि स्वात्मसात्कुरु संसारेस्मिन्विभो मोहात्मायाक्षिप्तं

त यत्कृतम् तत्सर्वं नाशमायातु होमादस्मान्महेश्वर

धर्मं देहि धनं देहि पुत्रपौत्रांश्च देहि मे आयुरारोग्यं

मे देहि देहि मे हव्यवाहन त्वमस्य मंत्रनाथाय नित्या

नंदमयाय च धर्मार्थकाममोक्षाय पुनरागमना

य च त्वमस्वन्यूनाधिकभावयुक्तं मया कृतमर्पय

विश्वमूर्ते प्रसीद देवेश नमोस्तु ते भ्यं प्रयाहि त्वं पुः

पुनरागमाय अग्निस्थं तेजः स्वात्मनि लीनं भावये

त् ॥ ततो मंडलाग्रे गत्वा गायत्रीः ॐ भूर्भुवः स्वः त

त्सवितुः २ तत्पुरुषाय २ प्रागवत् अद्यतावत् आ

त्मनः षडध्वदीक्षाफलप्राप्त्यर्थं कलशयागपूजन

मच्छिद्रं सम्पूर्णमस्तु एवमस्तु यवोदकं नमः उद

कतर्पणं नमः ॥ ततः कलशेपुदमापुच्छाणि ॥

ॐ ब्रह्महत्यादिपापानिह्यगम्यागमनानिच स्वर्णा
पाहरयकारीचसुरापानाग्रकृतस्तथः स्ववर्णाश्रमि
हर्ताचगोघ्नश्चपितृघातकः मातृघातीगुरुघ्न
श्चपापान्यन्यानिसर्वशः अन्यःकृतानिघोराणि
विविधानिसहस्रशः स्मरणादमनेशस्यभस्मसा
यांत्यसंशयः नश्यंतिशतजापाश्चयदिस्यात्कोपि
ब्रह्महा शतजापाश्चमंत्राणांसमकोटयश्चयाःशिवे
जप्ताभवंतिसर्वास्तामंत्रस्यास्यप्रभावतः चतुर्वेदे
षुयत्पुण्यंसर्वयज्ञेषुयत्फलं सर्वतीर्थेषुमाहात्म्यं
शतजापाश्चतद्भवेत् शतजापाश्चदेवेशिशिवस्य
ग्रेप्रपूजिते निर्वाणफलभुक्स्वर्योजन्मनैकेनभामि
नि जपेनैकेनतत्वंगिनित्ययुक्तस्यसुद्धधीः अ
ष्टोत्तरशतान्मंत्रीमत्समोनात्रसंशयः यस्यायंहृ
दिसंतिष्ठेन्नित्ययुक्तस्यभामिनि कुलान्युद्धरतेसोपि
दशसर्वान्दशापरान् नतस्यबाधतेमृत्युःकाल
ग्रलस्यसमवेत त्रिसंध्यंयःस्मरेन्नित्यंयत्रयत्रास्थितो
पिवा नमत्योर्वशमायातिनरोगोनचतस्करः स
कृत्स्मजितमात्रेणनश्यंतेहिंसकादयः नष्टादशादि
शोयांतिसिंहस्येवयथामृगाः सततान्भ्यासयोगे
नदारिद्र्यंनश्यतेकुलात् यास्मिन्देशेचकालेचनि

वसेन्मंत्रवित्सदा शापयोर्व्योदयश्चैव वो वेता
लस्कराग्रहाः शाकिन्यो विविधाग्रहाः पिशाचा
रा तथा ग्रहाः बालग्रहाश्च विस्फोटान्यंतरस्तान
राश्चये सर्वाणि विषजातानि दुर्भिक्षं रिपुपीडनं
सर्वं नश्यं भवेत्येतन्मंत्रवित्सन्निधानतः संपूज्यः सर्व
जंतूनां भूपतीनां च सर्वदा दानपूजनसन्मानैरस
मैः पूज्यते यदि तेन पूजितमात्रेण सर्वे मंत्रास्तु पूजि
ताः भवंति सर्वदा तस्य तान्सर्वांस्तान्पूजयेत्
सर्वत्र छेदकर्ता रोग्रहादिं संति साधकम् तस्माद्ग्र
हाणां दानं च सदैवोदकमोदनम् इत्थं ग्रहाः प्रस
न्नाः स्युस्तान सम्भवंति हि ततो ग्रहाणां स्तवमाख्या
मि ॥ ॐ ह्रां दशात्मन्नमस्तुभ्यं मार्तंडाय नमो नमः
व्यापिपत्रगदक्षस्य त्राणं कुरु दिवाकर १ रात्रीश्वर
कलंकांक नमस्ते रोहिणीपते संसारविषदग्धस्य
त्राणं कुरु निशाकर २ अंगारक नमस्तेस्तु सर्वदुः
खनिवारक ऋणपाशस्य दारिद्र्यस्य त्राणं कुरु धरासुत
३ सोमात्मज नमस्तुभ्यं ग्रहराजाय ते नमः भव
पंकनिमग्नस्य देहि शं रोहिणीसुत ४ वाचस्पते सु
राचार्य नमस्ते करुणापर पापस्य बुद्धिहीनस्य सदा
सानुग्रहो भव ५ विद्याधिगुरो काव्य नमस्ते क

रुणाय दर्शांतर्थरूपीजगद्रूपायाखिलगोःस्थित
९ नमः कृष्णशरीराय सूर्यात्मजनमोस्तुते संसा
रभयभीतस्य त्राणं कुरु शनैश्चर ७ केंद्रिकेयन
मस्तभ्यं ग्रहरूपी त्वं निवारय दुःखपावकदग्धस्य
त्राणं कुरु विधुन्तुद ८ सूर्योदयः केतवस्ताः शिव
भक्तिपरायणाः रक्षंतु यजमानस्य धनमायुः सु
न्ततान् ९ ॥ ॐ ऐरावणसमारूढो हेमवर्णोम
हाद्युतिः देवेन्द्रः सततं दृष्टः परमेशार्चने रतः
शिवपूजाजपोद्युक्तः शिवसद्भावभावितः शिव
प्रणामपरमः करोतु मम शांतिकम् १ भूतिवद्देहि
नां देवो ज्वलनः पापनाशनः शिवपूजाजपोद्यु
क्तः शिवसद्भावभावितः शांतिं करोतु मे देवस्तथा
पापपरिक्षयम् २ अंतकोऽयमहातेजाः शिवध्या
नपरायणः शिवपूजासमायुक्तः सेमारोग्यं क
रोतु मे ३ यत्तेंद्रो निर्ऋतिर्नित्यं शिवपूजापराय
णः करोतु मे महाशांतिं शिवभक्तिसमुत्सुकः ४
वरुणः परया भक्त्या शिवैकगतमानसः रोगशो
काग्निसंतापान्निर्नाशयतु मे सदा ५ पवनः परमो
देवः परमेश्वरभावितः सेमारोग्यं बलं शांतिं करो
तु सततं मम ६ कुबेरो वरदः श्रीमान्हरपादार्चने

कला
दी॰
१५५
२२२
155

रतः शांतिं करोतु मे प्रीतः शांतः शांतेन तेजसा
७ ईशानः परमोदेवः सर्वदेवोत्तमोत्तमः सोपिस
र्वात्मभावेन शांतिमाशुकरोतु मे ८ भूर्लोके थ भु
वर्लोके स्वर्लोके निवसन्ति ये देवादिव्य प्रभायुक्ताः
शांतिं कुर्वन्तु मे सदा मर्त्यलोके च ये देवाः स्वप्रभो
ज्वलविग्रहाः शिवभक्ताः स्वमनसो भयं निर्नाश
यंतु मे ततो यागाग्रं गत्वा ॥ अथ भैरवसमया अ
स्य मंत्रस्य कह्लालऋषिः गायत्रं छन्दः मृत्युंजयो
देवता ह्रूं ह्रूं ह्रूं अमृतमूर्तये व्योमव्यापिने व्योमशरी
राय सर्वसमयं शरयस्वरय सर्वसाधारणमंत्रशरीरा
य ह्रूं ह्रूं ह्रूं अमृतेपरमामृते नित्यक्रीडास्वाहा शंकपा
लेशनमस्तुभ्यं नित्यं देवेन्द्रपूजित शिवभक्तस्तुरा
णार्चीरत्नमां भैरवोत्तम १ भैरवेन्द्र नमस्तुभ्यं हुता
शनप्रपूजित शिवभक्तस्तुराणार्चीरत्नमां भैरवोत्त
म २ क्रोधराजनमस्तुभ्यं वैवस्वतप्रपूजित शि
वभक्त ३ विकरालनमस्तुभ्यं नित्यं नैर्ऋतपूजि
त शिवभक्त ४ मन्मथायनमस्तुभ्यं वरुणेनप्र
पूजित शिवभक्त ५ मेघनादनमस्तुभ्यं प्रभंज
नप्रपूजित शिवभक्त ६ सोमराजनमस्तुभ्यं नि
त्यं यक्षेंद्रपूजित शिवभक्त ७ विद्याराजनमस्तु

ध्यं नित्यं रुद्रप्रभाजित शिवभक्त ८ विश्वैकरूप
विश्वात्म विश्वसर्गादिकारणम् परप्रकाशवपु
षं सूक्ष्मः स्वच्छन्दभैरवम् विश्वातीतं विश्वमयं भै
रवाष्टकसंयुतम् सकलं निष्कलं शांतं वन्दे स्वच्छ
न्दभैरवम् नमस्तस्मै अघोराय घोरघोरतरात्मने
उत्पत्तिस्थितिसंहारलयानुग्रहहेतवे पंचब्रह्म
त्मकं देवं सांगं सानुचरं परम् साहूतिं च सशक्तिं च
ध्यायेऽहं महेश्वरम् ॥ ततो भैरवस्तोत्रं पठेत् ॥
एकमेकं श्लोकं पठन् अर्घ्यं पुष्पं यागे निक्षिपेत् यद्भक्तं
तत्रैव जपपूजाविधानान्ते स्तोत्रमंत्रमुदीरयेत्
महाभैरवनाथस्य सार्थं साधयेत् क्षणात् यागाः
पूर्णा भविष्यन्ति महाविघ्नाः सुदारुणाः हिंसका
चोररूपाश्च प्रपलायन्ति दूरतः इति फलश्रावणार्थं
पठेत् ॥ एवं कृते न यागेन मंत्रचक्रेश्वरार्चितः
जपपूजाविधानान्ते स्तोत्रमंत्रमुदीरयेत् अष्ट
विघ्नहा यातने सदा संसिद्धिप्रसिद्धिदम् महाभैरवना
थस्य विश्वरूपधरस्य च हृदयं शृणु सर्वोत्तम
हापापक्षयावहम् ॐ ह्रौं ह्रूं ह्रैं महामन्त्र मन्त्रात्म
मन्त्रनायक क्लीं फट् विद्युज्ज्योतिर्निलय ह्रौं ह्रौं फट्
फट् महाबल फं फं फंकार निर्घोष डं डं डं डमरु

कला
टी॰
१५९
156

श्वर हूंहूंहूं कुलवीरेशाह्लाह्लाउल्कामुखेश्वर फां
टांजम्मणामोहेशफ्रीफ्रींफ्रींफट्स्वरापह हंसः
हंसप दाज्ञनस्थितिज्योतिश्छवथ भासक फ्रींश्रींक्लीं
फ्रींक्रौं दिलेश महाकौलकुलेश्वर फ्रींफट्श्रींफ
ट्ह्रींफट्चत्रैलोक्याधिपते प्रभो जयहूंहूं चंड
चंडमन्मथदर्पविनाशन परमामृतगर्भापजराव्या
धिरुजापहव गांगींगूं गणनाथेश महाविघ्नौघ
मर्दन सर्वसिद्धिप्रदस्त्वं हिहूंफट्तापानिवर्हण
हूंहूंहूंहूं ठंठंपचरंरं घोरविषापह महोरगफ
णाटोपतमोबलनिवर्हण रेफैरममहाशवब्रह्म
नादसदात्मक महामायेशानमितभैरवाष्टकरह
जित ह्लुल्ह्लुल्कुलकुलजम्भजम्भमहाद्युते
योगेश्वरनमस्तेस्तु खेचरीगणनायक अमूर्तिस्त्व
मनंताख्यमादिमध्यांतगः प्रभुः इच्छादिक्रमम
ध्यस्थस्त्वं तेजात्मन्नमोनमः ईश्वरः परमात्मा तद्व्य
रूपो महाबलः ऊर्ध्वनादध्वनिरूपी मोहंहें तेन
मोनमः आदिदेवगणाध्यक्ष हृतिल्लिंगरूप
धृत लक्षम्यचराचरे त्वं हिबीजगर्भनमोस्तुते प
कवीरमहाज्योतिर्विद्यामात्मकानातन पंच
दिसर्वलोकेशवर्णात्मकायैवनमः ओंतमोनं

कृतं येन ब्रह्मांडं सचराचरम् मंत्रौषधिक्रिया
दिभ्यस्तं देवं प्रणमाम्यहं अंतकः सर्वभूतानां वि
सर्गांतप्रत्यादितः कालरूप नमस्तुभ्यं खेचरः खे
चरीप्रियः गगनांतरचारी त्वं घटस्तानितमध्यगः
शुद्धबोधप्रधानिरूप निर्वाणात्मन नमो नमः अंगामि
जननिर्भक्ष्मनाहतकलात्मग चंडतेजो नमस्तु
भ्यं परमामृतविग्रह टंकधारिन्निशानाथ कपि
नेत्राप्तवरप्रद ज्ञानराशे नमस्तुभ्यं परमामृत
विग्रह टंकधारिन्निशानाथ ठठरज्योतिरूपिणे
डामरेश नमस्तुभ्यं त्रैलोक्याद्भुतडामर डिंडिपटह
नादैस्वणादिज्ञानावसानग तांडदंडमध्यस्पृश
कीश्वर नमोस्तु ते स्थानाधिपान्धकारिपोदारिद्र्य
तिमिरांतक धनाधिपप्रगो मस्थानं तवचिन्मात्रते
नमः पद्मसंपुटमध्यस्थफणिनाथोरुमंडित
बहुरूपप्रचोराय नमः पापान्तकारिणे भग
भोगिनिमध्यस्थभवभंगामयापह मंत्रयोनेन
मस्तुभ्यं यंत्रवाहक ईश्वर रक्तादिसर्वशक्तीश स
र्वकामफलप्रद चिंतामणे नमस्तेस्तु नित्यानं
दसुखप्रद लक्ष्मीवल्लभयोगीश वरवीरसमावि
त शक्तीश्वरशांत नमनमस्ते नन्तवर्चस बोड

कला
दी·
१८०
२५८
157

शाधारपद्मगवगुह्याय योगिनीश्वर सर्वविद्याधिप
तये नमस्ते भक्तवत्सल हंसहंससदानन्दस्वच्छः
सर्वगतः शिवः त्वरात्वरविनिर्मुक्तमनोन्मन नमो
स्तुते आदिकान्तादित्यवपुःसोमः सोमकलापरः
भौमभौतिकदेहस्त्वं बुधबोधात्मने नमः हृत्हृत्हृ
त्तरस्त्वं क्लिह्रस्यातिरुदारधीः शोक्तकालान्तरगतः
शुक्रतेजायते नमः शनैश्चरतिभ्रूमध्ये नाडिचक्रे
श्वराय च शुक्रतेजोद्भवेशाय चिदाराह्लो नमोस्तुते
अश्विनीयोगसंस्थाय भरणीभरणाय च कृत्तिका
दर्पनाशाय कृत्तिवाससे वै नमः रोहिणीरोदना
त्प्रेशाम्रगजाशरणाय च सदार्द्रमुण्डहस्ताय भैर
वाय नमोस्तुते विंदुनादविनिष्क्रान्तज्योतीरूपपुन
र्वसो पुष्पपुष्पोद्भवेशाय पुष्यात्मक नमो नमः
संश्लेषयाभिश्लेषानशेषान्तपथेरत मघोनाधि
पविस्थीशपरमेश नमो नमः सर्वबीजफलाधार
स्त्रावासनिरंजन उत्तरोत्तरचिद्धामसर्वावास नमो
स्तुते हस्तपद्मवरमार्जारउच्चारोच्चारलक्षण वि
त्राश्चर्यप्रदोनाथ स्वसंविद्रूपिणे नमः स्वातन्त्र्योचि
त्वते यस्त्वचित्राविभवाकुलः विशाखो विशाखोदश
मनश्चनुराधाविभासक नमोस्तुते जगज्ज्येष्ठवि

स्वमूलामरेश्वर पूर्वापरविभागस्थउत्तरायणाभा
स्वर नमोनन्तप्रकाशायस्रवणोभवनिर्गत
शब्दनिःशब्दनिर्लक्ष्यलक्ष्यकेशाय मध्यग यना
डिपथनिष्ठोतशान्ताभिषेकचक्रवर्तिने पूर्वापरोत्तरै
वीकैर्भद्रात्मक नमो नमः क्रूरकरकटालम्बीमे
ग्रौसिंहासनास्थितः नमस्ते भुवनांतस्थकन्याहृ
दयवल्लभ प्राणापानतलारूढशक्तिव्यक्तिवि
भागशः वृश्चिकाभरणाकीर्णधन्वीपेनाकिने
नमः मकरध्वजदेहांतकालांतविध्वरान्तक प
रमामृतकुम्भाय नमस्तेमीनदिशक्तिद स्वदीमा
त्यंतगह्व नमोनादिकुलनायक ज्ञानगर्भनमस्ते
स्तु सर्वभावावयायिने कह्नकह्नवमवमाविवापि
वपवामृतम् नमस्ते प्राणनिलयजीवभूतशरी
रिणाम् दह्नदह्न पचपचवल्गावल्गामह्नेश्वर भै
रवाघेनमस्तुभ्यं सर्वभूतगुहाशय प्राणापानांत
रस्थायस्वशक्त्यामृतवृर्णित जीवबीजविभागा
यग्रहयायचतेनमः स्वभावोदयभास्वांतःस्थ
मार्गान्तरचारिणे पिंगनेत्रांतरस्थायत्रिधामात्म
नमोस्तुते इच्छाज्ञानक्रियादेहपरापरपरान्त
ग परापरत्रिकात्माय महाशक्त्यात्मनेनमः

कला
टी॰
१८८
२५८
158

भूतनन्तकलांतस्थसर्वातीतसनातन चिदात्म
किरणार्कायब्रह्मरूपात्मनेनमः सर्वकारणभूते
शब्रह्मेशरूपराव्यय नमस्तेव्योमरूपायसर्वगा
यभवाच्छिदे चिच्छित्योभयमध्यस्थपराकाशेसदो
दित महदानन्दसम्पूर्णः प्राणचंद्रनमोस्तुते प्र
स्फुरत्स्फुरभीमोग्रमहाकालकलाधिप कालाग्न्यादि
कलांतस्थसर्वव्यापिन्नमोनमः वर्गाष्टकपदाढ्य
पंचाशद्वर्णनायक भावाभाववनिःस्वभावसर्ववी
र्यायवैनमः गमागमान्तरगतविलसांतेसदोदित
नमोनिर्नामदेहायअविज्ञातस्वरूपिणे गुरूपदेश
गम्यायस्वसंविद्रूपलक्षण गुरुवक्त्रगह्रांतस्थमहा
बिन्दोनमोनमः एकोमात्रतमध्यस्थमहानन्द
परापर ब्रह्मनाडांतरचारीपापघ्नयनमोनमः
अरावरावशक्तंतर्भवान्तर्मात्रकान्तर वेदांतवि
श्रवांतस्थाग्निज्योतिःपरमोनमः सर्वज्ञेयगहन
शक्त्यापारोपविग्रहः वामदक्षिणमध्यस्थसदा
नंदात्मनेनमः अथऊर्ध्वान्तरस्थायएकमार्गात्रि
मार्गग भावाभावभवांतायनिर्लक्ष्यायनमोनमः
आनन्दानन्दानिःष्यन्दविश्रामामृतसम्भ्रम जीव
सजीवभूतायचिचैतन्यात्मनेनमः कौंडिनीगर्भ

विश्रांतशांतसंवित्तिगोचर वाचामतीतिदृष्टो

तस्मनाख्येयनमोस्तुते अतीद्रियशक्राधारनिरी

रूपरमेश्वर आद्याद्यात्मकनिर्शक्तसत्तामात्रनमो

नमः अन्तःस्वात्मभवज्योतिर्विकल्पमलवर्जित

भावगम्यनिरानन्दस्वानन्देशनमोस्तुते कला

कलंकरहितषट्ध्वसंविवर्जित ज्ञेयस्वभावज्यो

तीशानित्यानित्यायवेनमः अघोरघोरनिधन

घोरघोरसदाशिव ब्रह्मविष्ण्विंद्रनमितकारण

शनमोस्तुते स्वभावःसर्वभावानांचेतनानांतचे

तना ज्ञानानांतुपरंज्ञानंनिर्वाणायचतेनमः

महायोगिपतयेहकारार्थार्धरूपिणो निष्कलाय

विशुद्धायअगम्यायनमोनमः अनादिनिधनः

स्वस्थअर्थार्धपदनायक अस्तित्वमात्रचिन्मात्र

सदाव्यक्तनमोस्तुते स्थूलसूक्ष्मपरव्यक्तत्रिधा

व्यस्थःस्वरेश्वरः अष्टमूर्तिरनंताख्योनमस्तेवीर

नायक दुर्गमाद्दुर्गमतरःस्वशक्त्यानन्दवर्चस

संसारपाशविच्छेदज्ञानवेद्यायवेनमः व्योमपं

चकनिर्भेदीत्रिशिखोकारभास्वर व्योमामृताब्र

साधारज्ञानशीलनमोस्तुते महामायोदरांतः

स्थप्रसुप्तोरगसन्निभ भवबन्धनपाशोग्रमहा

कला
टी·
१८९
५६
159

मोहात्मनेनमः जन्मबन्धमहाघोरताडनावेश
कारक अप्रपञ्चप्रविवर्त्तीनांकुशनमोस्तुते
तस्मैनमोस्तुदेवेशब्रह्ममायायशम्भवे खेचरा
याभाज्ञपविक्रान्ताटोपभञ्जनाय अनेगांगवपुः श्री
मान्महाखङ्गधृङ्नमः निष्कम्पअचलज्योतिस्त्व
मेकोविश्वधारकः अविनाशिनिराभासवज्रदेहा
यतेनमः हृदयाम्भोजमध्यस्थोरावोब्रह्मात्मकः
परः तणोग्रन्थिविनिर्भेदिन्नाराचास्त्रनमोस्तुते
महादेवमहाकालमहामांसमहाव्रत महालालि
महानादमहाज्योतिर्महातपाः महाशक्तिर्महा
तेजामहामायावपुर्धरः महामंत्रमहानन्दमहा
विद्यामहेश्वरः महायोगमहाज्ञेयमहाज्ञानमहो
दयः महामात्रेशनामितमहासिद्धिफलोदय म
हामतिर्महाभोगीमहाघोरमहाबलः महाव्योम
न्महाकायमहामातृवनेरत योगीश्वरनमस्तुभ्यं
योगिनीचक्रनायक भूतवेतालरक्षःसर्वदेव
नमस्कृत महाप्रेतसमारूढकल्पान्तघननिःस्व
न कालाग्निशततेजाढ्यदुर्निरीक्ष्यनमोस्तुते
त्वंगतिस्त्रिषुलोकेषुत्वमात्माजगतःपिता त्वं
गतिःपरमामोक्षात्वंधाताविश्वसंभवः त्वदन्या

दपरो नास्ति त्वं देवेश प्रसीद मे एतत्स्तोत्रवरं
शप्यं सकृत्पाठेनाशिद्धिदम् भैरव्या भैरवस्या
ग्रे स्वं जातं ते देवि नित्यशः दानेन धूप
दीपादिवासने प्रीतये

दायकः प्रयच्छंति महाज्ञानं

लम् अजरामरसंसिद्धिस्तथान्यैकौ
स्तोत्रमंत्रेण भैरवि

त्रूपो ग्राः प्रपलायंति हूरतः एतत्परममंत्रोयं
पारम्पर्यक्रमागतम् भोगमोक्षार्थसत्वदं महा
सान्निध्यकारकम् योधीते स भवेद्रुद्रलोका
नुग्रहकारकः तस्य दर्शनसम्भाषान्मुक्तिर्जायते
स्वगाधिपे रहस्यमेतत्परमं ख्यातं चोत्तमासिद्धिदं
अदीक्षितानां प्रत्यक्षं मम समग्रं यतः क्वचित् उत्तमां
सिद्धिमान्विच्छन्नाख्येयं वीरवत्सले दीक्षितानां
नेमं त्राणं सुभक्तानां विशेषतः दातव्यं च महा
मन्त्रं स्तवराजेश्वरेश्वरम् ॥ इति श्री भैरवयाम

कला लैतंत्रे भैरवकुलवराजः समाप्तः ॥ करचरणकृ
दी० तंवाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं
१५० वापराधं विहितमविहितं वा सर्वमेतत्क्षमस्व
जयजय करुणाब्धे श्रीमहादेवशम्भोः क्षमस्व
मंत्रनाथाय नित्यानन्दपराय च धर्मार्थकाममो
क्षाय पुनरागमनाय च क्षमस्वन्यूनाधिकभाव
पूर्णं मया कृतमर्पय विश्वमूर्ते प्रसीद देवेश न
मोऽस्तु ते भ्यं प्रयाहि त्वं पुनरागमाय आवाहनं नै
व जानामि ॥ वह्निरूपगर्भादिस्तोत्रं पठेत् ॥ इति
देवं विसृज्य शिष्यपरोक्षं स्थंडिलान्निर्माल्यमीश
दिशि संहृत्य पंचगव्येन स्थंडिलमुपलिप्य मध्ये पु
ष्पांजलिं दत्वा बहिर्निर्गत्य बलिनर्पणं विधाया
चार्यसाधकपुत्रकपुत्रकसमयिव्रतिकुमारीश
कीश्च यथासंभवं विभज्य नैवेद्यं प्राश्याचम्य मंत्र
मालादि सर्वं जपं कृत्वा कृतकृत्यतां भावयेदिति
शिवम् ॥ अथ स्वच्छंदयोऽङ्गवह्निशशांकिपातक्र
माच्चत्रिविधगुणान्वितः प्रवरदीक्षाशिष्यान्वितः
मनोदयगुणान्वितः ख्याशीसंज्ञके वत्सरे प्रभा
वदयणोमणिमिज्ञ स्वतनस्यकर्मोच्चयः पवित्रा
रोहणानन्तरं रङ्गस्य चर्चानन्देस्वरस्ज्जनमुच्यते

तत्रपात्राणिगृहीत्वानत्रस्थैः सर्वैर्गुरुभिरष्टच
क्रेश्वरपूजनैर्विश्रुद्गुभिः कार्यमितिगुरवः ॥
ॐश्रीगणेशायनमः ॐस्वच्छन्दभट्टारकायन
मः अथगुरुक्रमबोधसारेणानन्देश्वरपूजनंलि
ख्यते भांडेसत्यव्रतागारुणेशशिथवलोदेव
ताभिस्थतनुभिः पात्रेदेव्यष्टमूर्तिर्विलसतिभगवा
नष्टचक्रेष्टमूर्तिः मुंडस्योर्ध्वैकलाभिःशशिवस
कष्टजैर्भैरवः पंचवक्त्रेजीयादेकादशात्मावसुश
शिकष्टजोभैरवः पंचवक्त्रः स्वस्वरूपंस्वमार्गस्थं
स्वसंवेद्यंस्वतेजसम् स्वानंदंस्वशक्तिस्थंभैर
वंतंनमाम्यहम् स्वस्वरूपांस्वमार्गस्थांस्वभावांस्व
कुलोदिताम् स्वतन्त्रांस्वपदारूढांभैरवींतांनमा
म्यहम् ॥ ॐफट् अनन्तशक्तयेस्वाहाफट् इति
मंत्रेणमद्यभांडंमंत्रयेत् भांडान्मद्यंगृहीत्वाच
लकमारभेत् मद्यासवाबन्धेनकरोसमालभ्यश
शिभास्कररूपोमध्ययामात्मकंमद्यंवह्निविभा
व्याशिरःपारांतंवपुःस्नापयेत् ॐह्रूंदेहवक्त्रांगा
निशोधयामिस्वाहेतिवक्त्रस्यहिंविधाय गायत्री
त्रिःपठेत् ॐह्रूंवामदेवायविद्महेस्वादेवधीम
हितन्नःस्वानंदःप्रचोदयात् इतित्रिः त आत्मा

कला
टी॰
१५१
161

सनायनमः इत्यासनेपुष्पंदत्वादिग्वन्धनावगु
ण्ठनेः स्वेणाकुर्यात ॐ श्रीपातालभूलोकाकाश
स्वर्महः जनः तपः सत्यंब्रह्मविष्णुरुद्रईश्वरसदा
शिवकालाग्नितेजोभुवनवासिनीभ्यः सर्वमातृ
भ्योवौषट् इतिब्रह्महत्यानिवारणार्घ्यदशादिक्
विंदुक्षेपः ॐ वां वामदेवभैरवायवौषट् इतिभां
डाद्बहिर्बिन्दुत्रयंनिक्षिपेत् वं वामदेवभैरवा
यवौषट् इतिमध्येनार्घपात्रंकुर्यात तेनसर्वद्र
व्याण्यभ्युक्ष्य ॐ ह्रींवीरभस्मनेस्वाहा सिन्दूरे ह्रीं
पुष्पेभ्योवौषट् ह्रींदीपाय ह्रुंमांसाय ह्रुंआ
सवाय वांमीनचरवेवौषट् ॐ क्षेत्रपालायनमः
क्षुल्ममांसे ह्रुं मांसे ॐ ॐ वौषट् अर्घ्ये
ॐ स्वाहा ॐ सिन्दूरे ह्रुं स्वाहा जले ततः प
ॐ थिकम् नीलांजनाद्रिनिभमूर्द्धजपिंगकेशं वृत्त
त्रिनेत्रलोचनमुपात्तगदाकपालम् आशाम्बरंभुज
गभूषणमुग्रदंष्ट्रंक्षेत्रेशमद्भुततनुं प्रणमामिदे
वम् कपालखट्वांगधरं मुंडमालाविभूषितम्
मध्यमोऽहरतं देवंभैरवं तं नमाम्यहम् ॐ ह्रुंप
थिकायैवौषट् देवसिद्धगणनागशाकिनीर
क्षोभूतपिशाचावेभूपातालवासिनीभ्यः पथिक

देवताभ्यः सांगचरेभ्यो वौषट् ॐ अजरादिक्षेत्र
पालेभ्यो वौषट् ॐ अभ्यागतेभ्यः पाथिकदेवताभ्यो
वौषट् इति भांडान्मध्यं गृहीत्वा पार्थिकं कृत्वा बहि
र्यक्त्कमादिमत्पुतं क्षिपेत् असंस्कृतेन देवे
न बलीन्द्रयाद्वत्कथंचन संस्कृतेन भवेद्विघ्नो व
लिहीनेन निष्फलम् भैरवस्य वक्रपंचकस्याग्रा
र्थे सर्वदा क्षिणपार्श्वमोनरमध्यवर्तिनो वटुकाद
यः मद्येन पूज्याः ते यथा ॐ क्रीं श्रीं देवीपुत्रवटु
कनाथायागच्छागच्छ उच्छुष्मक्षारिणे सर्वदुः
ह्सः ह्सः स्वपण क्षेत्रपालबलिं गृह्ण २ वौषट् इति
दक्षिणे वटुकबलिः ॐ क्रीं श्रीं फ्रें सः सः ह्रुं वौष
ट् योगिनीभ्यो नमः इत्युभौ ॐ क्ष्रीं इक्कीयरा
ष्ट्राधिपतये स्थानक्षेत्रपालाय वौषट् इति पार्श्व
मे ह्रूं क्ष्रूं स्रूं ह्रूं कलकलयाव थावत्तिष्ठ तिष्ठ सर्व
दिक्षु उन्मादय २ सर्वभूताः स्वर्गपातालवासिनः
प्रेतास्मान्भवन्तु सिद्धिः सर्वदा भवन्तु मे वौषट्
इति सर्वभूतबलिः ॐ क्रीं फ्रीं सः इति दिक्षु शश्वज्जा
ते चुलकचतष्टयं मध्ये भूमौ क्षिपेत् ततो रेचका
दीनि विधाय मानसयागं कुर्यात् स्वर्णावेपो
तासनोपरि प्रेतासनस्य मष्टादशभुजं रक्तवर्णं

कला
दी॰
१५२
162

नमोऽन्तं गयास्वरादेव्याः वृतं स्वं त्वा मनसा संस्पृश्या गन्यासं कुर्यात् द्वादशांते सहस्रारे भ्रूमध्ये तत्ताल्वनि मध्याह्नि नाभौ वायौ यज्ञान्तु ॥ इत्यादांशष्टे इतिसृष्टिक्रमेणन्यासः ॥ अपादांगुष्टे यज्ञान्तदेशे वायौ नाभौ मध्याह्नि ताल्वेचक्रे भ्रूमध्ये सकरान्ध्रे द्वादशांते इतिसंहारक्रमेणन्यासं कृत्वा ओं आधारायपर्यासनपद्मा आधारश क्तयेवौषट् सागराय वौषट् पोतासनाय वौषट् रक्तपद्मासनाय वौषट् ततः आधारोपरि भाण्डं संस्थाप्य आवाहनादिविधाय ओं ज्रं सः वौषट् कलामृतेश्वरभैरवाय नमः इत्यमृते शाकृद्यामृतीकृत्य ततो मध्यभांडमध्ये भैरवं भैरवींच पूजयेत् ओं ऐं आनन्देश्वरभैरवाय वौषट् ऐं सुरादेव्यै वौषट् सिद्धायै वौषट् शुक्लायै वौषट् रक्तायै वौषट् उत्पलायै वौषट् नमो नमो देवताभ्यो मातृभ्यश्च नमो नमः शाकिनी खेचरीभ्यश्च योगिनीभ्यो नमो नमः इतिवामहस्तेन अक्षधाधोविश्रूषः क्षिपेत् अथपात्रसंस्कारः आदौ सव्यहस्तेन ओं दीप अह्रूंफट् पाशुपतास्त्राय फट् पात्रं संदीपयामि नमः इतिछोटिकया पात्रसन्दीपनं

ऐं रें ह्रूं पात्रं संजीवयामि नमः ॐ ह्रूं पात्रममृतं
द्रावयामि नमः इति तन्त्रसंस्कारः सव्यहस्तेन
ॐ ज्रीं ह्रूं ह्रूं ब्लों ऽवषकाय इति प्रक्षालने ॐ
वें वामदेवाय वौषट् पात्रपवित्रकरणे ॐ फ
ट् अस्त्राय फट् इति सव्यपाणिनाधारोपरि अधो
मुखं स्थापयेत् तत्र आधारोपरात्पात्रमानीया
न्यत्र स्थापयेत् इति विशेषसंस्कारः वामेन ॐ ॐ
आत्मतत्त्वायाधारशक्तिबीजांकुराय वौषट् इ
ति भुवि ततो हस्तद्वयेन ॐ जं विद्यातत्त्वाय पद्मा
सनाय वौषट् पुनराधारोपरि पात्रमूर्ध्वमुखं सं
स्थाप्य ॐ सः शिवतत्त्वाय प्रेतासनाय वौषट् इति
ततः तिलकपंचकं कुर्यात् ॐ क्लीं ह्लीं ह्रूं सः इति
मंत्रेण क्लीं नारिकेलाय स्वाहा अपात्राः पात्रतां या
ति न रोपी स्वरतामियात् स्मृतिमात्रेण यस्यां सा
वन्दे विद्यां नरेश्वरीम् ॐ नमो भगवति क्लीं फ्रें ह्रूं
महालक्ष्मीश्वरि परयाम्रितकर्षशून्यप्रवाहिनि पर
माकाशभास्वरि सोमसूर्याग्निभक्षिणि आगच्छ
२ विश २ पात्रं हस्ल २ ह्रूं फट् २ इति नरेश्वरि वि
द्यया पात्रं प्रजयेत् इति रक्तस्य संस्कारः हस्तद्व
येन ततः पात्रं नारिकेलादिकं सूर्यचन्द्रपं द्रवहस्त

कला· टी·

183

स्थितं ध्यात्वा वामहस्ते श्रीहर्षदेवभांडं चंद्ररूपं सं
चिंत्य मध्ये स्वर्णमहादीप्तिमें तमग्निं विभाव्य ऐं
ब्रह्मांडखंडसंभूतमशेषरससंभृतम् आपूरितं
जगत्सर्वं पीयूषरसमावहेत् ऐं इति पठित्वा मद्यहस्ते
न पात्रमापूरयेत् तस्मिंस्त्वापूर्यमाणे क्लीं श्रीं भग
वति चंडकपालिनि भगवति ग्रस ग्रस ह्रीं ह्रीं स्वा
हा इति पात्रपूरणविद्या क्लीं श्रीं स्तनासविमुक्तशा
पनिकृंतनि क्लीं श्रीं ब्रह्महत्यां हर स्वाहा इति भाण्डं
पात्रं च करद्वयेन गृहीत्वा ब्रह्महत्यां निवारयेत् मन
गन्धसंकोचनं पीनःपुण्येन गुरुमुखविज्ञानात्कृत्वा क
न्दस्थाने षट्कोणमंडले ज्वलज्ज्वालाकारं ध्यात्वा
तन्मध्ये कुंडलिस्थितां कुंडलाकारविग्रहां प्रसुप्तभुजग
रूपां स्वेतांस्तथा ऊर्ध्वमुखीं प्राणापानोभयक्रम्भ
नान्मध्यमार्गप्रवाहेन चक्रषट्कं षोडशाधारं त्रि
स्थिद्वादशकं त्रिलक्ष्यं व्योमपंचकं प्राणोत्थाटनेन
भेदयंतीं शक्तिं ध्यात्वा तालुद्वाराधोभागे विनिवे
शयित्वा विंदुकवाटग्रंथिग्रन्थिभेदेन सावधानचि
त्तो ग्रहनं स्थित्वा पिपीलिकास्पर्शतुल्यं स्पर्शम
नुभूय दृढाचलितचित्तो ब्रह्मद्वारान्नीय द्वाद
शान्तं प्रापय्य तत्र शान्ते सदोदिते व्योमनि परं ज्यो

तिः संचिंत्य तेन परिपूर्णां पूरितां कुर्मेदुलावततद्वा
राप्रवाहममृतं तु तरंजनतस्मान्निमं शक्तिमार्गेणपति
तमविच्छिन्नप्रवाहेन नासामार्गेण धारासारमिव
निःसरंचिंतयित्वा मध्यपूरितेपात्रेपतितंध्यायेत्
पूर्णोपात्रेव्योमस्था देवतास्तप्ताभवंतिनत्यं तिच
पात्रमाधारोपरिसंस्थाप्य पूजयेत् ॐश्रीगणपति
नाथपाद ॐश्रीगणपतिवल्लभाम्बापाद ऐंवटु
कनाथपाद ऐंवटुकम्बापाद ऐंदेहल्यैनमः इति
द्वारपूजा ॐश्रीगुरुनाथपा ऐंपरमगुरुनाथपाद
ऐंपरमेष्ठिनाथपाद ऐंपरमाचार्यनाथपाद ऐंश्रा
दिसिद्धिनाथपाद ऐंस्वगुरुनाथपाद इतिवामे
गुरुपूजा आत्मानं मूलेन गन्धपुष्पैः संपूजयेत्
ततः परमेश्वरं पञ्चरागारुणं ध्यानेनध्यात्वा हंसंहूं
मध्यभैरवाय वौषट् इत्युत्कीलनम् पात्रम
ध्ये ऐं हं ह्रूं ऐं हूं ऐं ऐं अर्धनारीश्वरभैरवाय वौ
षट् हस्रक्लमलवयऊं आनन्देश्वरभैरवाय वौष
ट् सहक्लमलवरयऊं सरादेव्यै वौषट् इतिमूलं
ॐ ऐं करु २ वम २ विद्युज्जिह्वे महाभीमाट्टहासि
नि हस २ किलि २ दंष्ट्राकरालानने लोलितमा
नव दन जगद्ग्रासलम्पटे महाभैरवाय हनहन

कला
दी.
५५८
१६५

हूंहूंफट्फट्फट्स्वाहा पूर्ववक्त्रायनमः ॐ ऐं
महाभैरवायहन २ विकृताटोपघोरघुर्घुरारवाकु
लितप्रचंडकालानलदिव्यतेजोमहाभयानिर्वह
णज्वल २ गर्ज २ दह २ पच २ मथ २ हूंहूंहः
फट् ३ दक्षिणवक्त्रायनमः ॐ ह्रंमहावीराधिपत
येहस २ विहस २ विस्फूर्जयआत्मासमयामतेनमः
रं क्लुं वौषट् उत्तरवक्त्रायनमः ॐ ह्लंअघोरघोरसर्व
कामसिद्धिसिद्धियोगिनीशाकिनीचक्रान्वितमहा
रुधिरलोहितप्रसन्नतशान्तयेसर्वसौभाग्यप्रद
हूंहूंफट्स्वाहा पश्चिमवक्त्रायनमः ॐ ह्रींहूंसम
स्तविद्यालयायमहामंत्रेश्वरप्रबोधमहाधाम
परब्रह्मनित्योदितमहामोहापहस्वानन्दानन्दनि
र्भरनिष्कलयोगिगम्यशिवशाश्वतनित्यस्वभाव
निष्प्रपंचसदसत्सर्वयोगिनीमहामातृभैरवार्चि
तजय २ भगवन् हूं ५ फट्स्वाहा ऊर्ध्ववक्त्रायन
मः इतिवक्त्रपंचकम् ॐ महामध्यायविद्महेआ
नन्देश्वरायधीमहि तन्नःसोमःप्रचोदयात् ३
ॐ हूंनमःहस २ परमधाम्नेशिवात्मनेमहाभैर
वायहृदयायनमः ॐ हूंनमोभगवतेपरमशि
वायसर्वाधिपतयेशिरसेस्वाहा ॐ ज्रूंमहाभै

२ वाग्निशिखेज्वलिते विद्युल्लसी क्रूर २ महांत मोपरे शिवोयेवौषट् फ्रः फ्रःफट्फट् प्रस्फुर २ ज्वा लामालाकुलरत्नमां ह्रूं ह्रः फट् कवचायहुम् ॐ ज्रः सः दिव्यतेजोधिपतये सर्वसिद्धिप्रदो भवतज्ञा नात्मने नेत्रत्रयायवौषट् ॐ फ्रौं प्रस्फुर प्रस्फुर घोर घोर चट २ प्रचट २ कह २ फ्रःफट् स्वाहा अस्त्रा यफट् इत्यंगानि ऐं फ्रौं क्ष्रूं ज्ञानशक्तयेवौषट् ऐं फ्रौं यं वेदिन्यैवौषट् ऐं फ्रौं वं श्रावेदिन्यैवौषट् ऐं लं बो धिन्यैवौषट् ऐं फ्रौं मं उन्मादिन्यै वौषट् इतिदेव्यष्ट कं वा ऐं फ्रौं लं सम्मोहिन्यैवौषट् ऐं फ्रौं रं ग्रामन्यै वौ षट् ऐं स्तुं कुष्ठिन्यैवौषट् इतिदेव्यष्टकं वामाव र्तेन पात्रांतरे न्यसेत् ग्लूं स्लूं म्लूं प्लूं न्लूं ल्कूं रत्ने षूर्य स्यापादं इतिपात्रसंकरानिह्नत ये पात्रे रत्ने षदीक्ष्य येत स्लूं प्लूं म्लूं व्लूं लूं ब्रह्मविष्णुरुद्रेश्वरसदाशिवा त्मपंचकन्यस्यान्मतया मि फट् स्वाहा चकुकाय वौ षट् पात्रेचकुङ्क्समांसमर्पयेत ततः क्ष्मसमांसं मध्यमांगुष्ठमध्ये हृष्टान्नाङ्कपङ्क्तिं शिरसि न पयेत ॐ फ्रौं श्रौं भैरवाय वौषट् फ्रौं श्रौं अनाश्रि तशिवायवौषट् ऐं सदाशिवायवौषट् ऐं ईश्व रायवौषट् ऐं रुद्रायवौषट् ऐं विष्णवे वौषट्

कला
टी·
१५५
१६५

ऐं ब्रह्मणे वौषट् ऐं रुद्राय सम्वर्तसे वौषट् एवं व्यासाय वाल्मीकये याज्ञवल्क्याय वसिष्ठाय उपमन्यवे गार्गाय श्रीकंठाय सोमानंदाय क्षेमगुप्ताय उत्पलदेवाय अभिनवगुप्ताय क्षेमराजाय ज्ञानराजाय अमृताय देवेश्वराय प्रज्ञालिताय सदानंदाय शार्वानन्दाय वौषट् स्वगुरवे वौषट् इति शिरसि गुरुपंक्तिमध्येन संतर्प्य त्यानपि मन्त्रान्सुमध्येन तर्पयेत् ततः स्वब्रह्माण्डिमध्यं विश्रुत्य सिद्धान्तर्पणीयं यथा ऐं पादांगुष्ठचक्रे कालाग्निरुद्रभैरवदेवते ब्रह्म्यादिश्रुचरीचक्रनायकि ब्रह्मशक्तये गायत्र्यै वौषट् ऐं जानुचक्रे सद्योजातभैरवदेवते उल्कामुख्यादि दिक्चरीचक्रनायकि विष्णुशक्तये महामायै वौषट् ऐं गुह्यचक्रे वामदेवभैरवदेवते जयादिसिद्धादिवामादिदेवताचक्रनायिके क्रियाशक्तये नित्यक्लिन्नायै वौषट् ऐं नाभिचक्रे चंडेश्वरभैरवदेवते रक्तादिगोचरीचक्रनायकि कुंडलिनीशक्तये कामामालिन्यै वौषट् ऐं हृच्चक्रे अघोरदेवते ब्रह्मणादिमातृचक्रनायकि रुद्रशक्तये रक्तायै वौषट् ऐं मुखचक्रे महाभैरवदेवते कुलकौलादिज्ञानश्लोभ्याद्यष्टकयोगिनीचक्रनायके ज्येष्ठाश

क्तये कालरात्र्यै वौषट् ऐं भ्रूमध्यचक्रे विंदुभैर
वदेवते अघोरघोरतरशांतादिशक्तिचक्रनाय
कित्तानशक्तये विंदुमालिन्यै वौषट् ऐं कंठ
चक्रे अनाश्रितभैरवदेवते शांतोग्रखेखेचरी
चक्रनायकिइच्छाशक्तये शांतायै वौषट् इत्य
ष्टौ चक्राणि दंडे मध्यविभुद्भिः पूज्यानि ततोग्रंडे
ऐं आनन्देश्वरभैरवसहादेव्यर्धनारीश्वरभैरवाय
वौषट् ऐं चंडभैरवाय वौषट् ऐं क्रोधभैरवाय
वौषट् ऐं शंवरभैरवाय वौषट् ऐं असितांगभैर
वाय वौषट् ऐं स्वच्छन्दभैरवाय वौषट् ऐं रुरुभै
रवाय वौषट् ऐं कपालेशभैरवाय वौषट् ऐं उन्म
त्तभैरवाय वौषट् ऐं वामदेवभैरवाय वौषट् इति भै
रवाष्टकं दंडे पात्रे च विभुद्भिः पूज्याः ततः ॐ श्रीं वामा
यै वौषट् एवं ज्येष्ठायै रौद्र्यै काल्यै कलविकरण्यै
बलविकरण्यै सर्वभूतदमन्यै मनोन्मन्यै वौष
ट् दंडे पात्रे च विभुद्भिः पूज्याः गोधूमापूपरक्तिं
खेचरादिचतुष्टयम् यो भक्षयति पापात्मा वी
रोपि नरकं व्रजेत् ततः सर्वद्रव्यैः पिंडोत्पादनम्
वै पितॄणां नामोच्चारं कुर्यात् ॐ ह्रीं चंडे कापालि
नि स्वाहा मात्पितृनमुकान्भैरवगोत्रान्नित्यत्रमा

कला दी॰ 166

नित्यानन्दमयात्संपादयसंपादय इतिचरुमुद्रे
णानेनपिंडान्दद्यात् ततःपिंडूपरीतः पातालेचां
तरिक्षेचमध्येवाभुवनत्रये येकेचित्पितरःसर्वे
तृप्यंतुचरुपानकैः॥ आनन्देश्वरजपःकार्यः॥
अथचरुसमारणविधिः समस्तचक्रांतरचारि
णीनांदेहेश्वरीणांपरिहरणाय आयातस्मिंडुपरमा
मृतंचरुंममाम्बिकेदेहिसमागतस्य इतिवाम
केरेचरुंसोमरूपंध्यात्वादक्षिणेपात्रेरविरूपंसं
चिंत्यपंचामृतेनपूर्यवक्त्रेपीत्वावामामृतंसुधीः
हेवेशतर्पणंविधाय उन्मानवदनोभूत्वाप्रवि
शेन्मध्यमांकलाम् पिंडरावंसमुत्सृज्यवामेशी
र्षयेत्ततः इतिपात्रान्मध्यंपीत्वाधोमुखंपात्रंसं
स्थाप्याधोमुखस्यपात्रस्योपरिलेपोदद्यात् सम
यापंचकंपात्रेकुंभेचपूजयेत् तथादौकुंभंवा
महस्तेनगृहीत्वासुक्रशापहरीविद्यांपठेत्॥
ॐ ह्रींएंनमः तेजोराशेसर्वसमन्तात्स्फाद्कारि
णिमध्यरूपाविश्वमोहासिद्धिदायिनिमहोत्साहि
निमिमेकपालिनिवद२ रंग२ समयंसमेप्रय
च्छकुरुद्रोहिस्वरासवप्रियेसुक्रशापनिकृंतिनि
वत्सरह्न्यारूरेह्रींएंफ्रुंफट्स्वाहा इतिसुक्रशा

पद्मरीपठित्वाकुंभेपात्रेचपूजयेत् ततःश्या
नन्दसमयापंचकंकुंभेपात्रेचपूजयेत् तत्रा
दौध्यानम् रक्तांत्रचर्मवसनांप्रेतारूढांचनर्ध
जाम् कायवेद्व्यगपरांदेवीमानन्दसमयांनमः
ओंहूंहूं महाभैरवविरक्तरक्तचामुंडोद्दरीसर्वमा
लाकुलेनरचर्माहृतकटेप्रेतारूढेवीरश्मशा
नेश्वरिविच्चेस्वाहा १ ओंक्लींक्रूंकुलकौले
श्वरिश्याश्यासपत्नानंदाम्बतौचेनमःसः
सर्वकामप्रदेक्लींक्रूंस्वाहा २ ओंह्रांपिंगवक्त्रायेहं
सर्वाकर्षिणिहंनिःशेषजगत्कोडीकराणिहंप
रमानन्दभास्वरेहंअनलव्यापकेहंभगवतिका
लसंकर्षिणिफट्स्वाहा ३ ओंक्लींक्रांशिवशालि
संभावाम्बतामोदपरिमलस्वरामिनदेहेचंडचंडे
श्वरिमहाकापालिनिरुजापिंगलासप्तमातामध्य
स्थिकुलकौलेश्वरिस्वानंदाम्बतौचेनमः २ सर्व
कामप्रदेविच्चेह्रूंक्लींक्रंफट्स्वाहा ४ ओंक्लीं
षट्चक्रषोडशाधारप्रभविवोषट् जठरमातः
सप्तमातामध्यरंध्रसमविषमनित्योदितप्रभवे
गप्रचक्रेश्वरिस्वानन्दाम्बतौचेनमः २ सर्वका
मप्रदेविच्चेस्वाहा ५ इतिपंचसमयांपूजामर

कला दी. १८० (6)

णांकुंभेपात्रेचसंभृत्य भगवंतमानन्देश्वरभैरवंवि
सर्जयेद्यथा ॐ फ्रुं भगवन्सर्वमंत्रार्चिषे व्योमव्या
पिने महाचक्रेशशक्तीशाक्तनायिकमरितं त्वमक्ष
मे पुनरागमनाय प्रसीद सर्वसिद्धीः प्रयच्छ नमो
नमस्ते स्वाहा ॥ इति विसर्जनमंत्रः इति कलादी
क्षायां रहस्यचर्चा समाप्ता ॥ ॥
ॐ अथानन्देश्वरजपविधिः ॐ अस्य श्रीआनन्देश्व
रभैरवमंत्रस्य कालाग्निरुद्रभैरवऋषिः सम्रा
ट्छन्दः आनन्देश्वरभैरवो देवता श्रीं बीजं क्रीं
शक्तिः ह्लीं कीलकं जपे विनियोगः ॐ जूं सः इत्या
दिन्यासः अथ ध्यानं सूर्यकोटिप्रतीकाशं चन्द्र
कोटिसुशीतलं अष्टादशभुजं देवं पंचवक्त्रं त्रि
लोचनं अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरिस्थि
तम् वृषारूढं नीलकंठं सर्वाभरणभूषितम्
कपालखट्वांगधरं घंटाडमरुकवादिनम् पाशांकु
शधरं देवं गदामुसलधारिणम् खड्गखेटकप
ट्टिशमुद्गरोच्छूलकुंतिनम् विचित्रखेटकार्मु
डवरदाभयपाणिकाम् लोहितांगं सदेवीकं
बहुलाच्युतनमस्कृतम् आनन्दभैरवं ध्यायेद्रो
गमोक्षैककारणम् ॥ अथ मूलम् ॥ ॐ जूं सः

सः जं ॐ आनन्देश्वरभैरवाय वौषट् स्वाहा
१०८ ॥ गुरोरिति तर्पणम् ॥

एलानि मधुनो दशाक्षि गुणमत्र देयं जलं
सिता च मधुना समा कटुकनागवल्लीयु
तम् समं खदिरचूर्णकैः पिबस्व विचन्त
भिर्युतं रसायनमिदं परं हरिहराप्रियं पानकम् ।
मधूकखर्जूरपनसकैर्यो द्राक्षायुतैः संभवतेक
षायः मनीषिणस्तं प्रवदंति सद्यो देवीप्रियं पा
नकनामधेयम् ॥ एलाः त्वक् नागकेसरे
स्तंगाधिपत्राणीति चतुर्जातकम् ॥

आदावन्त्यादिवर्णान्तं दद्यान्मन्त्रोपरि प्रिये अ
यमुत्कीलनो मन्त्रः संजीवनमतः परम् विसर्गवी
जादिवर्णान्तमादौ दद्यात्सुरेश्वरि तत्पदे प्रोच्चरे
दादिबीजं वर्णान्तमीश्वरि अस्यायं मंत्रराजस्य
प्रोक्तः संजीवनो मन्त्रः सिद्धमंत्रस्य जप्येदं संपु
टस्य मतः परम् बिलादिवर्णबीजांतमन्ते दद्या
त्सुरेश्वरि सम्पुटस्यास्य मंत्रोऽयं गोप्तव्यः पशुस
न्निधौ ॥ प्रकाशम् ॥ ॐ रुद्ररूपेभ्यो अघोरे
भ्योथ घोरेभ्यो घोरघोरतरेभ्यश्च सर्वतः शर्व
सर्वेभ्यो नमस्ते ॥ इत्युत्कीलनम् ॥ सर्वतः

कला
दी
१६८
168

शार्वसर्वेभ्योघोरघोरतरेभ्यश्च अघोरेभ्योघघो
रेभ्योनमस्तेरुद्ररूपेभ्यः ॥ इतिसंजीवनम् ॥
अघोरेभ्योघोरघोरतरेभ्यः सर्वतः शार्वसर्वेभ्यो
नमस्तेरुद्रेभ्योघघोरेभ्यः ॥ इतिसम्पुटीकरण
म् ॥ ॐनमोमृत्युजिद्भट्टारकाय शुभेदिने
समारभ्यविष्टिवेदादिवर्जितम् स्वपात्रस्यैव
शिष्यस्यदीक्षांकुर्वीतदेशिकः ॥ तत्रादौस
म्भारपत्रिका ॥ यथा ॥ घृतंतिलास्तथाध
पद्मयंश्रीचन्दनद्वयम् जातीफलानिष्टगाय
त्रोटाः कुंकुमबिल्वजाः पंचगव्यंतथाक्षीरं
दधिपिष्टकमेवच श्रेष्ठाः समिधयोदर्भाः सर्वौ
षधयएवच नागदंशार्करेत्वादिसत्वथान्या
निस्रावकाः नाटीपर्णोसर्षपाश्चयवालाजा
स्तथैवच कुसुमानिविचित्राणियागेयोग्या
निसाधकैः मीनमांसंकलशोचवस्त्रवस्त्रैर्वोप
लकस्तथा सम्भाराः सर्वमानीययागवेदीच
स्थापयेत् ॥ मसूरायवगोधूममाषाश्चद्रुति
लास्तथा शालिमुक्काश्चसप्तैतेव्रीहयः परि
कीर्तिताः ॥ यवगोधूमनीवारश्यामाः कङ्गु
प्रियंगवः धान्येनसहसप्तैतेव्रीहयः सप्तदा

प्लुताः ॥ कुशमासारुहीद्वेष्वेष्वाशोवामिथा
तथा बिल्वमज्जादेवसुनिर्नागकेसरमेवच शै
लेयचप्पकसराणवचावेञ्जूरमूलकम् कटु
कावटुपत्राणिजीवनाद्यगणस्तथा पञ्च
चारिणिदूर्वायोसर्वौषध्यःप्रकीर्तिताः प्रत्ये
कंतुपलाःसप्तहोमयेज्जातवेदसि ॥
प्रथमदिनेहुतमनद्वयं मनमाग्निकार्यार्थंति
लस्यच २॥ द्वितीयेदिनेहुतमनत्रितयंच
रुविधिस्थ ३॥ रक्षाबन्धः तृतीयेदिनेहुतम
नषट्कं मनं ६॥ रुद्रांशापादनंतावत्सम
यदीक्षाविधिः यज्ञोपवीतं चतुर्थदिनेहुतम
नसप्तकंमनं ७॥ पंचमेहुतमनं ३॥ एवं
२१॥ ॥ अग्निंविसृज्य सर्वेषांमंत्राणां
मेलापंकुर्याद्यथा ॥ विघ्नेशावरणंचक्रेच
क्रंपद्मेपद्मंत्रिशूले त्रिशूलंगदायांगदांध्वजेध
जंपाशेपाशंवज्रेवज्रंदण्डेदण्डंशक्तौशक्तिंव
न्हेवज्रमनन्तेअनन्तंब्रह्मणिब्रह्माणमीशाने
ईशानंकुबेरीकुबेरंवायौवायुंवरुणेवरुणंनै
ऋतेनैऋतंयमेयममग्नौअग्निमिन्द्रेइन्द्रंविद्या
राजेविद्याराजंसोमराजेसोमराजंमेघनादेमे

कला
दी॰
१६६
169

येनादं मन्मथे मन्मथं विकराले विकरालं क्रोधराजे क्रोधराजं शिखिवाहने शिखिवाहनं कपालेशे कपालेश मसेः नेत्रे नेत्रं कवचे कवचं शिखायां शिखां शिरसि शिरो हृदि हृदयं मूलमन्त्रे तं वक्त्रौ वक्त्रे तेजो मन्त्र कलशे कं चिन्ताले भावयेत् इति सर्वमंत्राणां मेलापं कृत्वा मेलापविद्यां त्रिः पठेद्यथा ॥ ॐ ह्रीं श्रीं सः सः सः स्वैः सौभाग्यदायिनि हूं सर्वागीश्वरि पद्मे ह्रीं हूं सर्वमन्त्राणां कुरु कुरु सर्वसम्पत्प्रदायिनि सर्वदुष्टनिवारिणि सर्वजगद्वशीकरि विभक्तानां मंत्राणां मेलापं कुरु कुरु प्रसादो भव मे ह्रीं श्रीं सः सः हूं हूं ॥ इति मेलापविद्या ॥ ततः कलशं स्पृष्ट्वा ॥ अशेषतमोनाशकानि कलशस्य पदित्वा ॥ यत्रादिस्थितं मन्त्रकलशे तेजः तस्मिं स्तेजसि नानाविधा मंत्राः स्फुलिंगा इव मंत्र कलशेन्तः प्रविष्टाः ध्यातव्याः तत्कलशगतं तेजः सृष्टिसंहारिणोः सकलभैरव भट्टारकरूपं निष्कलनाथे सोऽपुच्चारक्रमेण बिन्दौ बिंदुमानादे नादं शक्तौ सामर्थ्ये चंद्रनिरोधिन्यां समनायां मन्याव्यापक स्वरूपे लीनेति मंत्रयंत्रक

मेणाविभाव्यतंव्यापकचिद्रूपं ऌं ॡं ॠं ऋंप
रमंमन्त्रतेजः ॠं ॡं ऌं स्वात्मन्यर्पयामिनमः
इतिभोगद्वादशांतेश्रीत्वाप्राकेनदृश्यंक्र
त्वायथावन्मनसातत्रप्रजयेदितिगुरवः ॥
अथत्वमामन्त्रः ॥ ॐ श्रीं ग्रीं ह्लीं ध्रीं ज्यों परमेष्ठ
रथरुद्रसाधिपतेसर्वसमयसुद्धामृतवशेनप्रति
ष्ठांवह्नसन्निधानंकुरुकुरुकायिकवाचिकमा
नसपापंशोधयशोधयहृदयस्फीतिमुत्पाद
यउत्पादयहृदयशक्तिंभेदयभेदयसराचा
वलेपंनिवारयनिवारमदैश्वैतिष्ठतिष्ठस्थलस्थ
लवह्ननसमपातालनाकवासिनंह्रूंह्रूंफट्
स्वाहा ॥ ततोमन्त्रकलशैर्यजमानस्या
भिषेकः कार्यः ॥ ॐ सुरास्त्वामभिषिञ्चन्तुब्र
ह्मविष्णुमहेश्वराः इत्यादिभिर्मन्त्रैर्यजमानः
स्याभिषेकाशीर्वादौ देयौ ॥ ततो बहुरू
पगर्भस्तोत्रराजंपठेत् ॥ शिवमस्तुशिव
म् ॥ १ ॥

कला
दी
~~१८~~
१७०
170

ॐश्रीमत्सद्गुरुनाथाय ॥ अथदीक्षाया अवश्य
कर्तव्यता ॥ तथाचागमकल्पलतायां तथाऽदी
क्षितमर्त्यानां यद्दोषं कथयामि तत् आगमस्य संहिता
यां अदीक्षितानां मर्त्यानां दोषं शृण्वन्तु पण्डिताः
अन्नं विष्ठासमं तस्य जलं मूत्रसमं तथा अदीक्षित
कृतं श्राद्धं श्राद्धं चादीक्षितस्य वा गृहीत्वा पितर
स्तेषां नरके च सुदारुणे पतन्त्येव न सन्देहो या
वदिन्द्राश्चतुर्दश सहस्रैरुपचारैश्च भक्तियुक्तो
यजेद्यदि तथाप्यदीक्षितस्यार्चां देवा गृह्णन्ति
नैव हि कर्माखिलं वृथा यस्मात्तस्मात्त्यजेददीक्षि
तः तस्माददीक्षितं दृष्ट्वा किंचित्कार्यं न साधयेत्
दीक्षाग्रहणकाले तु पापराशिः पलायते निर्वा
णपदसंयुक्तो वह्निर्गच्छति तत्परः तदा देवपि
तॄणां तु कार्यार्हो भवति स्वयम् अन्यथा यत्कृतं
कर्म हुतं भस्मनि तल्यवत् तथाग्रमेव दीक्षाया
नित्यत्वं परिचक्षते अतीश्वरस्य मन्त्रस्य नास्ति त्रा
ता यथा भुवि तथा दीक्षाविहीनस्य नेहसामीप
रत्र च न तपोभिर्जपैर्होमैर्विविधैश्चापि साधनैः
न कदाचित्क्रियाभिश्च दीक्षाहीनस्य सिद्ध्यति किं
चिदिति शेषः दीक्षामूलं जपं सर्वं दीक्षामूलं परं

नपः दीक्षामाश्रित्य निवसेद्यत्र कुत्राश्रमे वस
न् अदीक्षितस्य मरणे रौरवं नरकं व्रजेत् त
स्माद्दीक्षां प्रयत्नेन सदाकुर्याच्च नान्त्रिकात्
कल्पेदृष्टानमन्त्रान्वै यो श्लाति नराधमः स
न्वन्तरसहस्रेषु निष्कृतिर्नैव जायते दीक्षि
तानां तु सर्वेषामधिकारोत्र निश्चितम् अतः
प्रथमतो दीक्षां प्रवक्ष्यामि विशेषतः ॥ तथा
च वैशम्पायनसंहितायां शौनकं प्रति व्यासवा
क्यम् दिव्यंज्ञानं यतो दद्यात्कुर्यात्पापक्षयं यतः
अतो दीक्षेति सा प्रोक्ता देशिकैर्मन्त्रवेदिभिः या
वन्न प्राप्यते दीक्षा पुरुषार्थफलप्रदा सर्वसिद्धि
करी दीक्षा सर्वसम्पत्प्रदायिनी प्रतिभास्वरवर्णा
निमारणोच्चाटनानि च वशीकारं च कविताबु
द्धिस्तथा रणाङ्गना तारणं च समुद्रस्य वह्नेः शै
त्यं रणे जयम् विपिने चाभयं चैव शोकदुःखा
पहं तथा धर्मार्थकाममोक्षाणि ददात्येषा न
संशयः असाध्यसाधनी दीक्षा अदैवदेवकारि
णी ये भ्यसंति परां दीक्षां सर्वकामदुघां भवि
ते व्रजन्ति परां स्थानं गुर्वाराधनतत्पराः ॥ इति
शुभम् ॥

171

२२

नं० ५५६६-प
कलादीक्षा (तन्त्रम्)
पत्राणि १८१ (संपूर्णम्)

